शाङ्खायनश्रौतसूत्रभाष्यम्।

ओम्।

१

पुरुषस्य बुद्धिपूर्वकारिणोऽभ्युदयं निःश्रेयसमुपादित्सितं तच्च विशिष्टक्रियासाध्यम्। सा च वैदिकी[1] क्रिया नान्या काचित्। कुत एतत्। प्रमाणत्वाद्वेदस्य। कथं वेदस्य प्रामाण्यम्। अपौरुषेयत्वात्। अर्थप्रत्यायकत्वात्[2]। बाधकप्रत्ययाभावात्। तत्प्रभवत्वाच्च कल्पस्य प्रामाण्यम्। स च कल्पः परिनिष्पन्नप्रयोगरूपकस्योपदेशको ग्रन्थः। पदार्थरूपोपदेशमात्रप्रयोजनो[3] वैदिक एवायमर्थ इत्यभ्युदयनिःश्रेयसार्थिभिरादर्तव्यः सकलपुरुषार्थसिद्धये। तस्यैतदादिसूत्रम्।

१. पुरुषस्याभिमतफलदायी[4] जगदुत्पत्तिबीजं यज्ञः। यद्यपि च द्रव्यदेवतात्यागात्मा तथाप्यत्र साङ्गो विवक्षितः। इदमत्र प्रधानमेतान्यङ्गानि इयमितिकर्तव्यता। एवं साध्यसाधनरूपेण मर्यादया श्रुतिसिद्धया प्रथयिष्यामः। गुरावात्मनि च बहुवचनं शिष्टैः स्मर्यते। तत्र[5] चोदयन्ति यज्ञमिति द्वितीया न प्राप्नोति। अवयवषष्ठ्या

१ A [illegible] २ C ॰प्रत्यय॰। ३ A स्वरूपो॰। ४ पुरुषार्थस्या॰। ५ A यत्र।

तु भवितव्यम्। अशक्यत्वात्। तदयुक्तम्। कुतः। श्रुतेः। स एष सर्वकामस्य यज्ञः। स एष स्वर्गकामस्य यज्ञ इति। तस्माददोषः। यज्ञमित्येकवचनं जात्यपेक्षम्। अधिकारसूचमेतत्। प्रतिज्ञा च शिष्यबुद्धिसमाधानार्था।

२. यज्ञमिति द्वितीयान्तं प्रकृतमिह प्रथमया विपरिणम्यते। तदर्थः स इति निर्देशः। स यज्ञस्त्रयाणां वर्णानां भवतीति वाक्यशेषः। अथवा सच्छब्दः साधुवाची पूर्वपदम्। त्रयाणामित्युत्तरपदम्। तेनैतदुक्तं भवति। शोभनानां त्रयाणां वर्णानां यज्ञे ऽधिकारः। तदेवमङ्गहीनाश्रोत्रियषण्ढशूद्रवर्जं अधिकारः सिद्धो भवति। किं पुनः कारणं अर्थिनः समर्थाश्च शूद्राः प्रतिलोमाश्च नाधिक्रियन्ते। उच्यते। श्रुतिदर्शनात्। अथश्रियाल्मा एतद्यज्ञेन प्रसृजति शूद्रांस्तदिति शतपथे।

३. ब्राह्मणश्च क्षत्रियश्च ब्राह्मणक्षत्रियौ। तयोर्यः शूद्रां जातः[१] पुत्रस्तस्यावर्णत्वान्न प्राप्नोति। वैश्यस्य च यः करण्यामुत्पद्यते तस्य च न प्राप्नोति। तदर्थं वचनम्।

४. संयोगः संबन्धः इदमस्येति विशेषनिर्देशः। तमकृत्वा यदभिधीयते तत्साधारणं भवति। [ये तत्र प्रकृताः]। परिभाषासूत्रमेतन्न्यायप्राप्तम्। अथोदाहरणम्। दर्शपूर्णमासौ त्रयाणां वर्णानाम्। अन्वाहार्यश्चतुर्णामृत्विजाम्।

५. संयोगो ऽसाधारण्येन व्यपदेशः। तेन हेतुना संयुक्ता-

१ B C om. शूद्रां जातः।

युज्यमानं व्यवतिष्ठते। व्यवस्थितविषयं भवति। आर्थत्वाच[1] संयोगो ऽभिप्रेतो न शाब्दः[2]। तद्यथा। पुरोधाकामयज्ञो ब्राह्मणस्य। सोमाङ्गमग्निचयनं दीक्षासंयोगात्।

६. विशिष्टसंनिवेशः शरीरस्थसूत्रो यज्ञोपवीती शिष्टप्रसिद्धः। तथा च मनुः।

> उद्धृते दक्षिणे पाणावुपवीत्युच्यते बुधः।
> सव्ये प्राचीनमावीती निवीती कण्ठसज्जने॥ (२,६३)

ईदृशो यज्ञोपवीती देवार्थानि[3] कर्माणि हविःप्रक्षेपप्रभृतीनि तदङ्गानि चेत्थंभूतः करोति। कुतः। उपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत्कुरुत इति वचनात्।

७. प्राचीनापवीती[4] कृतापसव्य इत्यर्थः। पितृणामिमानि पित्र्याणि। पिण्डपितृयज्ञश्राद्धादीनि। तानि प्राचीनापवीती कुर्यात्। कर्मग्रहणमनुवर्तते[5]। तेनोदीरतामिति शंसने न प्राचीनावीती[6]। कर्तृधर्मश्चायं। प्राङ्न्यायानीत्यत्र कर्मधर्मः। तेन सर्वसाधनानां दक्षिणाचारता। अतो योगभेदेनोक्तम्।

८. येनाधिकरणेन होत्रादिना संयुज्येत संबध्येत तेनाचमनप्रभृति। नान्यथा। तेन च संयुक्तः प्रवृत्तकर्मा न व्यावर्तेत। व्यावर्तेन भक्षणं तत्र कुर्यात्। तथा च कात्यायनः। विहृत्याहृत्य वेतरथावृत्तिः।

---

१ C अर्थ॰। २ A शाब्दाब्दः। ३ A om. च here and further on. ४ A ins. देवार्थानि कर्माणि पित्र्याणि कर्माणि C in marg. ५ C इति पैच्यः सव्यन in marg. अनन्तप्राचीनावीती B इति पैच्यः शंसनप्राचीनावीती सव्येन

८. यज्ञं यज्ञान्तरेण। विच्छिन्दति ह वा एतद्यज्ञमिति श्रुत्यन्तरात्। अथवा तदधिकरणं शौचादि पदार्थान्तरेण न व्यवेयात्। न च व्यवदध्यात्। चशब्दाद्गार्हपत्याहवनीयौ च।

१०. यज्ञोपवीत्यादिका आवृतां लक्षणा। आवृच्छब्देन कर्माण्यभिधीयन्ते। लक्षणा प्रायोवृत्तिरित्यर्थः। केषांचिल्लक्षणोद्देश इति सूत्रच्छेदः। तेषामप्ययमेवार्थः।

११. इत्यावृतामिति वर्तते। उद्दिश्यते पठ्यते। आम्नाय इत्येको ऽर्थः। य उद्देशः पाठक्रमो ब्राह्मणे सूत्रे वा तेनैव क्रमेणावृतः कर्तव्याः। न तु क्लृप्तीनां पाठक्रमेणानुष्ठानं सर्वस्वारपराकयोर्मध्ये पाठात्।

१२. यज्ञाधिकारो ऽनुवर्तते। यज्ञे सर्वत्र अवचने उत्तरत उपाचारः। उपाचारो ऽनुष्ठानम्। उत्तरतउपाचारो वै यज्ञ इति श्रुतेः। क्वचिद्वचने ऽपि स्वस्य धिष्ण्यस्य पश्चादुपविशेत्। समीप उप आङ्प्रयोगात् न दूरे।

१३. प्रागित्ययं दिक्शब्दः। न्यायशब्दो धर्मपर्यायः। आचारपर्यायो वा। यत्र दैवार्थानि कर्माणि तत्र प्रागेव। कर्मणि प्राची दिगङ्गीकर्तव्या।

१४. पितृणाममूनि पितरो वा देवता येषां तानि दक्षिणाचारेण कर्तव्यानि।

१५. आसीन उपविष्टः। न्यायशब्द उक्तः। वाक्यं वक्तव्यानां न्यायोक्तम्। तदुपविष्टेन कर्तव्यम्।

१६. तिष्ठन्नन्वाहाग्निमन्थनीया इत्येवमादिषु वचनेषु विकल्प

मा भूदिति सूत्रारम्भः परिभाषाणामनित्यताज्ञापनार्थम्। तेन[1] तथा च शाखान्तरीयो होत्रासमासः[2]।

१७. यदनादिष्टकर्तृकं वाक्कृत्यं तद्धोता कुर्यात्। चकारो वाक्कृत्यानुकर्षणार्थः। वचनविरोधाभ्यां मैत्रावरुणादयो ऽपि कुर्युः। सप्त होतार ऋतुशो यजन्तीति होतृशब्दप्रयोगात्।

१८. प्रभृतिशब्द आदिवचनः। त्रिप्रभृतिसंख्यामारभ्य ये ऋग्गणा ऋक्समुदायास्तेषां प्रथमायामुत्तमायां च त्रिरुक्तिः प्रत्येकं[3] कर्तव्या। किं सर्वत्र। नेत्युच्यते। अन्यत्र जपेभ्यः। जपान्वर्जयित्वेत्यर्थः। त्रिप्रभृतिष्विति गणविशेषणं कुर्वन्नेतज्ज्ञापयति। क्वचिद्द्विक[4] को ऽपि गणो ऽस्ति। किमेतस्य ज्ञापने प्रयोजनम्। आवर्तते पशुगणे मनोतेति पशुद्वये ऽपि मनोतायाः आवृत्तिः सिद्धा भवति।

१९. अत्र ओकार आदेशो विधीयते। स च देशत्वात्स्थानमपे[क्षते]। तदुच्यते। स्वराणामृचि संनिविष्टानां यो ऽन्त्यः स्वरस्तदादे[र्वि]धीयते। तत्र कदाचिदृगन्त्ये स्वरः केवलो भवति। कदा[चित्स]व्यञ्जनः। स चोभयरूपो ऽपि छन्दोमानमित्युच्यते। तस्य [आ]दौ व्यञ्जनं तत्तदङ्गमेव। तस्मात्परमोकारस्य स्थानम्। अत[स्त]स्मिन्भवति। स च शुद्धः अप्लुत इत्यर्थः। चशब्दात्कश्चिदुत्तमा[क्ष]रात्। तत्रोदाहरणम्। उपांशुयाजो[5] भवति। भवतं दाशुषे [म]यः। ओमिति। तत्र वक्ष्यमाणेन सूत्रेण। उत्तमस्य छन्दोमान-

---

१ B om. तेन। २ A त्रो। ३ C प्रत्यंकं प्रत्येकं। ४ A क्वचिद्द्विगणको ऽपि [ग]णो। ५ A ०ज्ञ

स्योदाहरणम्। जिन्वतोमिति। केचित्तु चकारस्तुग्गणार्थमित्येवं व्याचक्षते।

२०. य ओकारः पूर्वसूत्रे स्थानी विहितः स मकारान्तो भवति। ओमिति।

२१. तं प्लुतं मकारान्तं च[1] प्रणव इत्याचक्षते याज्ञिकाः। प्रणवप्रयोजनं सप्रणवो द्वितीयश्चतुर्थश्चेति। केचित्तु उत्तमस्य च छन्दोमानस्येत्यत आरभ्य तं प्रणव इत्याचक्षत इत्येवमन्तमेकं सूत्रं प्रणवसंज्ञार्थं वर्णयन्ति। तदप्युपपद्यत एव।

२२. अवसानं विरामः। तस्मिन्नवसाने मकारान्तं प्रणवं कुर्यात् सर्वेषु चाग्गणेषु। तद्यथा। स्तेषु चयेषु वाजिनोम्। सर्व-ग्रहणात्सामिधेनीष्वपि। तद्यथा। उग्रान्तस्येत्येकां सामिधेनीं त्रि-रनूच्य। अथापि सर्वग्रहणाद्गणधर्मलक्षणः प्लुतः प्रणवः सिद्धो भवति। सपुरोनुवाक्येष्विति बहुव्रीहिसमासः। तेन सहेति तुल्ययोग इ वोपसर्जनस्येति च सहशब्दस्य सभावः[2]। तेनैतदुक्तं भवति। पुर नुवाक्यासु चायं मकारान्तः। ततः शंयोर्वाक्ये न भवति। स पुरोनुवाक्यासु चेति च वक्तव्यं सुखावबोधार्थम्। सत्यम्। किं अप्राधान्यार्थं च। तस्मात्पुरोनुवाक्यानामन्यो गणधर्मो न भवति अतश्च षष्ठे ऽहनि ऐन्द्रवायवस्य चतुर्णां गणत्वे ऽपि सत्यपि प्रथमो त्तमयोस्त्रिर्वचनं न भवति। मकारान्तश्च प्रणवः प्रत्यृचं भवति।

२३. तेनेति व्यवहितः प्लुतः परिगृह्यते। तेन प्लुतेनोत्तरस्य र्धर्चः पादमर्धर्चं वा यथावचनं संधायावस्यति प्रयोक्ता। तत्संतत

१ B C om. च। २ पा० २. १. २८; ६. ३. ८२.

मित्याचक्षते । रूढा हि तस्यैव संज्ञेत्यर्थः । संततमितीतिकरणः प्रदर्शनार्थः । तेन संहितं चेति । तथा च श्रुतिः । अर्द्ध एव प्रणवः स्याच्छस्त्रानुवचनयोर्मध्य इति ह स्माह कौषीतकिस्तथा संहितं भवतीति ।

२४. योऽयं पूर्वं उक्तो धर्मस्त्रिप्रभृतिष्वित्येवमादिषु स सर्वेषामृग्गणानां व्यवस्थितानामपि शोंसावो इत्यनेन भवति[1] । ये कर्मसंयोगेन चोद्यन्ते । हविर्धानप्रवर्तनादयश्च । न तु जपानामक्रियासंयोगात् ।

२५. विदूरेष्वन्तर्हितेषु च अपिशब्दादनन्तर्हितेषु च कर्मस्वध्वर्य्वादिभिः क्रियमाणेषु गणमध्ये ऽन्तरेण प्रथमामृचं परिधानीयां चोत्तमामृचं संतानार्थः कर्ता अर्धर्चेन करणभूतेनाकाङ्क्षति । तत्कर्माध्वर्य्वादिभिः क्रियमाणं प्रतीक्षत इत्यर्थः । तद्यथा । जातायानुसम्प्रैषे । विदूरे उदाहरणम् । तद्यथा । समानजातीयानुसमये[2] सर्वा...यास्तृतीये वचने प्रथमे यूपे अर्धर्चावसानं[3] कृत्वा तत एवं ...षु यूपेषु अर्धर्चमर्धर्चमञ्जनीयाया उक्त्वा ततो यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे उच्छ्रयस्व वनस्पते ...स्य श्रयमाणः पुरस्तात् जातो जायत ऊर्ध्व ऊ षु ण ऊर्ध्वा नः ...संसो नि केतुना विश्वं समचिषं इह । यदूर्ध्वस्तिष्ठा इत्येवमादि ...तियूपमुक्तार्थं ।

---

१ C om. भवति । २ A समानजातीयाया अनु॰ C ॰जातीया अनु॰ । ३ B ...च अवसानं ।

२६. अर्धर्चावसानन्याया अर्धर्चन्याया एवंधार्मिका इत्यर्थः। याः कृत्रिमा रात्रिपर्यायस्तोत्रियानुरूपाद्यास्तदर्थः सूत्रारम्भः। तत्र स्तुभ्याममात्रा चोदना। नावसानचोदना[1]। ननु यद्येवमर्थं सूत्रं कथं बृहतीं शस्त्वोत्तमं पादं प्रत्यादायोत्तरस्याः प्रथमेनावसायेति। न दोषः। उदाहरणप्रपञ्चार्थत्वादस्येति। चकारः पूर्वेण सह समुच्चयार्थः।

२७. अर्धर्चन्यायाद्यदन्यत्तद्वचनाद्भवति। त्रीणि पदानि समस्य पत्नीनामवस्येदित्ययं विधिः कथं नाम प्रातरनुवाक एव भवेदेवमर्थं सूत्रम्। ननु च क्व चान्यत्र प्राप्नोति। उच्यते। अस्य सूत्रकारस्य शैलिरेषा[2]। आद्ये हि दृष्टो यो धर्मः स सर्वत्र प्राप्नोति इति[3]। तद्यथा। तृणनिरसने अप उपस्पृशेदित्युक्त्वान्यत्रोपस्पृशेत्याह नान्यवर्णं करोति।

२८. उच्चैस्त्वारणन्यायः। को ऽसौ। ऋग्वेदः। चकारो [illegible] जपेभ्य इत्यस्यानुकर्षणार्थः। अत एतदुक्तं भवति। यज्ञे जप[illegible] ऋग्वेद उच्चैर्भवतीति[4]। अतश्च ऋग्वेदविहितं यजुरूहप्रवरना-धेयादि सर्वमुच्चैर्भवतीति।

२९. उपांशु गार्हपत्ये पत्नीसंयाजेष्वरन्तीत्यत्र विकल्पो भवति। भावप्रत्ययनिर्देशाच्छ्रुतिविहितं लक्षणं द्रष्टव्यम्। यथैक-मिथः संशृण्वीरन्निति।

३०. समित्येकीभावमाचष्टे। स्थारः स्थानम्। एकं स्थानं

---

१ A ०सानं। २ B शैलिरेषा. C in marg. शैलियं। ३ B om. इति। ४ B उच्चैर्भैर्नी।

मन्त्रादि कार्यम्। शब्दानां ध्वनीनामित्यर्थः। न्यायतेतिवचनात्प्रयोक्तुः स्वशास्त्रापेक्षम्[1]। चशब्दो ऽन्यत्र जपेभ्य इत्यस्यानुकर्षणार्थः।

३१. यज्ञ इत्यनुवर्तते। ऐकस्वर्यमेकश्रुतिप्रयोगः कार्यः। भावप्रत्ययनिर्देशो लक्षणान्तरप्रापणार्थः। तेनाजपन्यूङ्खसामस्विति सिद्धं भवति। चकारः शब्दानामित्यस्यानुकर्षणार्थः। पृथग्योगकरणात् पूर्वसूत्रे यो विधिः स विकल्पेन भवतीति विज्ञायते।

३२. तरामितीषदर्थे। प्रणवादीनामुच्चैरेव विधानात्।

३३. पुनःप्रणववचनादेतल्लभ्यते। प्रैषव्यवच्छिते च। शस्त्रान्तीयाच प्रणवादुच्चैस्तरां याज्या भवति।

३४. याज्याया उच्चैस्तरां वषट्कारः कर्तव्यः।

३५. याज्यया वा समो वषट्कारः। उच्चैस्तरां वेति विकल्पः।

३६. प्रणवादयः प्रसिद्धाः। संप्रैषग्रहणं माध्यन्दिनार्थम्। यत्र ...ैर उच्चैस्त्वं प्रणवादयो ऽपि। अतो न पत्नीसंयाजादिषु। तत्र ...पांशुत्वमेव विधानात्। उपांशुहविर्यागचोदनास्वित्यर्थः।

३७ उपांशुहविःष्विति वर्तते। उपांशुहविःषु देवतानाम...ं वक्ष्यमाणेष्वावाहनादिषूपांशु भवति। देवतानामवचनाच्च हवि...म। नामवचनाच्चाख्यातमजुषतेति शब्दः। धेयवचनं प्रत्यक्षाभि...ानार्थम्। ततो न मेधपतिः। चशब्दादृगादौ च।

३८. भूर्भुव इत्ययं मन्त्रः प्राग्याज्यायाः प्रयोक्तव्यो जपधर्मेण।

३९. पुरस्ताज्जपानन्तरं ये यजामहे। याज्यान्ते वौषट्। तत ओजः सहः सह ओजः स्वरिति उपरिष्टात्। इतीति नियमार्थम्।

---

१ A •क्षा।

ततो याज्याबहुत्वे ऽपि न गणधर्मः। चतुष्टयग्रहणं परस्परानपेक्षार्थम्[1]। ततो येयजामहप्रतिषेधे सत्यपि पुरस्ताल्लक्ष्माप्रतिषेधः[2]। सर्वास्विति यदि नोच्येत ततो ये यजामह इत्यात्मनेपदबहुवचनं बहुयजमानके कर्मणि सत्त्रादौ व्यवतिष्ठेत। सर्वग्रहणात्तु[3] सर्वत्र भवति।

४०. त्रीननुयाजान्यजतीत्युक्त्वा इत्यनुयाजयाज्या इति वक्ष्यति। तेषु येयजामहो न भवतीति।

४१. वाजिनस्याग्ने वीहीत्यनुवषट्कारः। सोमस्याग्ने वीहीत्यनुवषट्कार इति वक्ष्यति। तत्र येयजामहो नास्ति। ननु च[4] अनुवषट्कारस्य याज्यासंज्ञैव नास्ति। सत्यम्। येयजामहप्रतिषेधाद्याज्यासंज्ञापि[5] भविष्यति।

४२. वक्ष्यति। चतुर्मात्रो याज्ञिकी प्लुतिरिति। अतस्तेन प्लुतेन चतुर्मात्रेण याज्यान्तेन। वषट्कारस्य वौषट्शब्दस्येत्य
संधानमव्यवच्छेदः कार्यः। इत्थंभूतेन याज्यान्तेन संधानं विद
प्लुतो ऽपि विहित एव। स्वरस्यायं प्लुतः। तद्धर्मत्वात्। व्यञ्जन
च सन्ध्यन्तरविधानाद्याज्यान्ते।

४३. अप्लुतेन[6] वा याज्यान्तेन वषट्कारस्य संधानं कार्यम्
पूर्वेण सह एकयोगे क्रियमाणे पक्षे व्याकरणसिद्धा त्रिमात्रा प्लुति
स्यात्। तन्निवृत्त्यर्थं पृथक्सूत्रकरणम्।

४४. तत्प्लुतसंधानम्[7]। उपांशुयाजे उपांशुयाजमात्रके।

१ BC परस्परस्यापेक्षार्थम्। २ C लक्ष्मापि प्र॰। ३ A C सर्वत्र प्र॰। ४ A om. च। ५ B inserts इति after ये यजामहे। ६ A अप्लुतान्तेन। ७ A C प्लुति॰

केवलमग्नीषोमीयवैष्णवयोः किं तर्हि सर्वत्र तनूदेवतादावपि प्लुतसंधानं नास्ति। ननु च उपांशुयाज इतीयमग्नीषोमीयवैष्णवयोः संज्ञा। तत्रैव प्लुतसंधानप्रतिषेधः प्राप्नोतीति। सत्यम्। अस्तीतिवचनात्सर्वत्रोपांशुयजने प्रतिषेधः।

२.

१. आवाह्यते ऽनेनेत्यावाहनः। को ऽसौ। आकारः। तमाकारं प्लावयेत्। चतुर्मात्रं कुर्यादित्यर्थः। ननु आवहादिं प्लावयेदिति वक्तव्यम्। सत्यम्। किं तु यस्मिन्कर्मणि या यष्टुमभिप्रेतास्ता एवावाहयितव्यास्तदभिप्रायमेवमुक्तम्। अत आवह देवान्यजमानायेत्यत्र आवहादिः प्लुतो न भवति। आह। किमर्थं प्लावयेदिति ण्यन्तनिर्देशः। उच्यते। अग्निं होतायावह[1]। अत्र प्लुतेन सह आकारीभूतस्य[2] समानाक्षरे सस्थान इति[3] दीर्घ एव प्राप्नोति। स मा भूत्। प्लुत एव यथा स्यादिति ण्यन्तनिर्देशः।

२. यो ऽयं चतुष्टये निर्दिष्ट एकारान्तो येयजामहे एष प्लुतादिः कार्यः। न च व्यञ्जनस्य प्लुतिः। असामर्थ्यात्। अनुस्वारं मकार इति च याज्यान्तस्य वर्णान्तरोपदेशात्। तथा च। ऊकालो ऽज्ह्रस्वदीर्घप्लुतः। अचश्चेति (पा० १.२. २७. २८)। वैयाकरणाः। ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचीति शिक्षाः। पुरस्तात्पूर्वस्मिन्देशे। याज्यानामिति षष्ठीनिर्देशादुपांशुयाजे ऽपि प्राणसंधानं भवत्येव। तथा चाश्वलायनस्य सूत्रम्। प्राणसंततः प्रणवः

---

१ B adds इति। २ B आकारस्य। ३ प्राति० १.९।

पुरोनुवाक्यायाज्यागूर्वङ्काराविति। आगूःशब्दश्च तेषां येयजामहे प्रसिद्धः।

३. यज्ञे भवा याज्ञिकी। कासौ श्रुतिः। श्रुतेन याज्यान्तेनेत्येवमाद्या। सा चतुर्मात्रा कार्या। या पुनराम्नायपाठे स्वनिगदोक्ता सा व्याकरणलक्षणेन त्रिमात्रा। तस्या यज्ञेऽपि प्रयुज्यमानाया न चतुर्मात्रता। किं कारणम्। यज्ञं व्याख्यास्याम इति यज्ञाधिकारे याज्ञिकीति वचनात्। अतः अध्वर्यवे चोरपा३ इति त्रिमात्रैव। अधः स्विदासी३दिति वाचःस्तोमे प्रयुज्यमाना त्रिमात्रैव। याज्ञिक्येव[1] या केवला न पाठे। यज्ञे च तस्याश्चतुर्मात्रता नियम्यते।

४. याज्यान्त इति वक्ष्यमाणमिदं संबध्यते। सामर्थ्यात्। याज्यान्ते वर्तमानानां सन्ध्यक्षराणां एकारादीनां चतुर्णां मध्ये ये द्वे तालव्ये सन्ध्यक्षरे एकारश्चैकारश्च ते प्रत्येकं आकारश्च प्लुत इकारश्च मात्रिकः अनेन रूपेण भवतः। अभूततद्भाव इति च्विः (पा० ५. ४. ५०)। अत्रोदाहरणम्। त्वष्टारं सोमपीतया३ इ वौषट्। ऐकारस्योदाहरणम्। आदिदसूनि प्र च वाचास्मा३इ वौषट्।

५. ओतः[2] स्थाने यथोक्ते ओष्ठ्यस्थाने सन्ध्यक्षरे ओकारश्चौकारश्च। तत्र ओकार आ३उ ईदृशं रूपमापद्यते। एवमौकारः। वसु देवो दधातु ना३उ वौषट्। ननु ओकार आमन्त्रितश्च प्रगृह्य इत्येवमादिना लक्षणेन सर्व एव प्रगृह्यो याज्यान्ते तस्य किं ग्रहणेन। सत्यम्। किं तु वाक्यस्थानामप्रगृह्यस्तदर्थं वचनम्।

---

१ A याज्ञिक्येवकेवला न पाठे B चेव। २ A औहें। B ओष्ठ्य०।

६. प्लुतापेक्षमन्यत्वम् । प्लुतादन्यानि याज्यान्तस्थाप्लुतपक्षे प्रकृत्या भवन्ति । प्रथमया प्रकृत्या यथास्वभावमित्यर्थः । अक्षराणीति वचनात् प्रातिशाख्यगतमपि विकारं नापद्यन्ते । तद्यथा । अभिनिष्टु-कारः श्रयते सर्वथाप्यपदान्तभाक् । प्लुता याजीत्यतो ऽन्येषु पदेष्व-क्षेति विपक्षे[1] । इमा हरी वहतस्ता नो अच्छ वौषट् । एवं प्रयोगः । एवं मधुशब्दो ऽप्युदाहार्यः । आरकारीभावश्चाप्लुतपक्षे न भवति ।

७. प्रकृत्येति वर्तते । एकारस्य ओकारस्य प्रश्लिष्टौ सन्तौ प्रकृत्या भवतः । प्लुतपक्षे ऽपीति सूत्रारम्भः ।

८. सन्ध्यक्षराणां तालुस्थाने इत्यारभ्य यदुक्तं तद्याज्यान्ते भव-ति । वक्ष्यमाणं च । मध्ये ऽधिकारात् ।

९. यः प्रातिशाख्ये रेफीति संज्ञित ऊष्मा रेफी पञ्चमो नामिपूर्व इत्येवमादिना प्रकरणेन[2] स याज्यान्ते वषट्कारेण सह सन्धौ रेफमापद्यते । उदाहरणम् । अभि यन्ता वामस्य देव भूरे वौषट् ।

१०. विसर्जनीय इति वर्तते । अरिफितो विसर्जनीयो याज्यान्ते लुप्यते । अदर्शनमस्य भवतीत्यर्थः । उदाहरणम् । युक्त-ग्रावा जायते देवकामा३ वौषट् ।

११. याज्यान्त इति वर्तते । याज्यान्ते वर्तमानो मकारो वषट्कारेण सह सन्धौ अनुस्वारमापद्यते । अनुस्वारः प्रातिशाख्ये प्रसिद्धः । अथोदाहरणम् । जिह्वामग्ने चकृषे हव्यवाहां३ वौषट् ।

---

१ प्राति० ७. ९. । २ प्राति० १. ३०

१२. विसर्जनीयो रिफित इत्येवमादिभ्यो यान्यन्यानि । उक्तेभ्यो ऽन्यानि[1] । तानि प्रकृत्या भवन्ति । प्रकृतिश्चात्र प्रातिशाख्यलक्षण-मभिप्रेता । अतो यथालक्षणं भवन्तीत्यर्थः । ननु सर्वोपधस्तु स्वर-घोषवत्परो रेफं रेफीति[2] विसर्जनीयस्यापि प्राप्तमेव । नेत्युच्यते । कथम् । अनामिपूर्वत्वादप्राप्तो विसर्जनीयस्य । कथमनामिपूर्वः । उच्यते । अकारादयो दश नामिनः स्वरा इति[3] दशानां नामि-संज्ञा । न तु प्लुतस्य । तस्माद्रिफितस्य सन्धिरुक्तः । ननु लुप्यते ऽरिफित इति किमर्थमुच्यते । [4]प्रातिशाख्यलक्षणेन सर्वोपधस्य प्राप्तो लोपः[5] । एवं तर्हि अनुस्वारं मकार इति किमर्थमुच्यते । अन्तःस्थासु रेफवर्जं परासु तांतामिति[6] मा भूदित्येवमुक्तम् ।

१३. वषट्कारे य औकारः स चतुर्मात्रो भवति । ननु वषट्कारे औकारस्यासंभवात्कथं एवमुक्तम् । आह । वौषट्शब्दो वषट्कार इत्युच्यत इत्येतस्य ज्ञापनार्थम् । तेनोच्चैस्तरां वषट्कार इत्येवमादौ सर्वत्र वौषट्शब्दो द्रष्टव्यः । प्लुत इति वक्तव्ये चतुर्मात्र इत्युच्यते । पुरस्ताद्दीर्घमित्यत्र द्विमात्रो मा भूत् ।

१४. वौषडित्यत्र द्वौ स्वरौ । तयोरौकारस्य चतुर्मात्रतोक्ता । अकारस्यानेन सूत्रेणोच्यते । आह । यद्येवं अकारस्येति[7] वक्तव्यम् । उच्यते । स्वधा नम इति वषट्कारस्य स्थाने वक्ष्यति । तत्र स्थानि-

---

१ A °यथाप्युक्तेभ्यो यान्यन्यानि अन्यानि तानि प्र° B om. अन्यानि C in marg.
२ प्राति° ४. ८ । ३ प्राति° १. २० । ४ A inserts अन्तःस्थः । ५ A निल्लोपः ।
६ आश्व° १. ९. १० । ७ A अकारस्येति वक्तव्यम् B om. अ. C अ° ।

यज्ञायात्स्तुतिः प्रतिवर्षं मा विज्ञायीति। अतश्च तथापि द्वयोरेव भवति।

१५. उभावप्यौकाराकारौ यथाख्यं भवतः। वाशब्दो विकल्पार्थः। पक्षे पूर्वो ऽपि विधिः। ननु न वा इति सूत्रं कर्तव्यम्। नेत्युच्यते। चतुर्मात्राया एव प्रतिषेधः प्राप्नोति। न तु व्याकरणश्रुतेः। तन्निवृत्त्यर्थं प्रकृत्येति। उभावित्युच्यते। स्वधा नम इत्यत्र धा इत्यस्य श्रुत्यर्थम्। यथैवोभौ तथैवायं पक्षः स्यात्।

१६. पक्षे औकारः प्रकृत्या भवति। वाशब्दो विकल्पार्थः।

१७. षळित्यत्राकारः प्रकृत्या भवतीति आत्रुकर्ण्य आचार्यो मेने। आचार्यग्रहणं पूजार्थम्। वेत्येव हि वर्तते।

१८. स्वमतस्थापनार्थं सुयज्ञाचार्यः श्रुतिमुदाजहार। तथैवोक्तम्। यद्ध्रस्वं तद्रथन्तरं यद्दीर्घं तद् बृहदिति। एवं बृहतो रथन्तरस्य च रूपं संपादयन् वषट्कुर्यात्। वौ इति दीर्घं चतुर्मात्रमित्यर्थः[1]। षळिति ह्रस्वं मात्रिकमित्यर्थः।

१९. येयजामहशब्दमुच्चार्य अनन्तरं देवतादेशनं द्वितीयान्तं कुर्यात्। अपुरोनुवाक्ये प्रदाने। चशब्दः कुर्यादित्यस्यानुकर्षणार्थः। यद्यप्यर्थो देवताशब्दो विद्यते यथाग्निं स्तोमेन बोधयेति तथापि नियमतः कुर्यात्। इज्यमानाया आदेशनं द्वितीयान्तं चेत्येतदाचार्यसामर्थ्यात्सिद्धम्।

२०. अप्रैषे प्रदाने देवतादेशनं न विद्यते। न कर्तव्यमित्यर्थः।

---

१ A चतुर्मात्रिकमि॰।

तुशब्दो नियमार्थः । यद्यपि प्रैषे देवतादेशनं नास्ति यथा धाना सोमानामिन्द्रेति तथापि याज्यायामादेशनं न भवति ।

२१. परिभाषेयं द्रव्यनियमार्था । वक्ष्यति । सक्ता जुहोति प्रहुताहुतौ जुहोति इत्येवमादौ सर्पिर्घृतं विलीनं जानीयात् । इतिकरणात् प्रत्ययान्तरेणाप्युक्ते । तद्यथा । विप्रुषां होमः । सुवमिद्धे जुहुयुरित्येवमादौ सर्वत्र ।

२२. येषां होममन्त्राणामाम्नाय एवान्ते स्वाहाकारो न पठितस्तेषां[1] अन्ते कर्तव्यः ।

२३. समिध आधीयन्ते हूयन्ते यैर्मन्त्रैस्ते समिदाधानमन्त्राः । तेषामप्यन्ते स्वाहाकारः प्रयोक्तव्यः । पूर्वसूत्रेणैव सिद्धे सत्यारम्भो नियमार्थः । अतः प्राकृतहोमे[2] उदकाञ्जलींस्त्रीनप्सु जुहोतीति[3] न स्वाहाकारः ।

२४. कर्म प्रधानं मन्त्रो गुणभूतः । तस्य[4] गुणस्य भेदादनुक्तो ऽपि गुणो साहचर्यादनुमीयते । सूत्रारम्भे एकार्थानां इदमाप इत्येवमादीनां विकल्पः स्यात् । नानार्थानामुद्ध्रियमाणामृताकृतिमित्येकस्यामेव क्रियायां मन्त्रसमुच्चयः स्यात् । स मा भूदिति सूत्रारम्भः ।

२५. कं प्रपद्ये तं प्रपद्य इत्येवमादौ मन्त्रे भिन्नवाक्ये ऽपि सूत्राम्नायोक्त इतिकरणो द्रष्टव्यो मन्त्रान्तज्ञापनाय[5] । चकारः समुच्चयार्थः । अतश्च केषां चित्स्वाहाकारः । केषां चिन्नमस्कारः । केषां चिदसिशब्दः[6] ।

---

१ B तेषामप्यन्ते स्वाहाकारः प्रयोक्तव्यः । २ B inserts यथा C in marg. ३ A ins. चादौ । ४ B तत्र । ५ B ज्ञापकः । ६ B सि ।

२६. करणशब्दो ऽत्राधिपूर्वो द्रष्टव्यः। अतोऽधिकरणेषु होतृचमसे ऽवनयतीत्येवमादिषु ऋते त्वा भक्षितमिति मन्त्रान्तेनावनयनकर्मणः संनिपातनम्। मन्त्रस्यान्तः कर्मण आदिः। एवमनुष्ठानम्। अधिकरणेष्विति वचनादाप्यायनोपस्थानपर्युक्षणादिष्वनियमोऽधिकरणाभावात्। संनिपातनमिति। यत्रैकत्र निपातनं संभाव्यते तत्र। न तु क्रियमाणानुवादिषु। भिन्नदेशावस्थानात्कर्त्रोः।

२७. परिभाषयमवधिनियमार्था। यदा संप्रेषितो ऽध्येषणापूर्वं[1] चोदितस्तदा होतृमैत्रावरुणादिः पठेत्। यदेवाध्वर्युराहानुब्रूहि यजेत्यथैव ते कुर्वन्ति य ऋचा कुर्वन्तीति शतपथे।

२८. संप्रेषित एव।

२९. इतिकरणोऽत्र परिसमाप्त्यर्थः। यदनुक्रान्तमेतत्सर्वयज्ञेषु भवतीत्यर्थः। ननु असंयुक्तविधानात्सिद्धम्। सत्यम्। किंतु गृह्यारण्यकसूत्रविधानोक्तं न प्राप्नोति। तदर्थं[2] वचनम्।

३.

उक्ताः परिभाषाः। श्रुतिक्रमेणेदानीमग्न्याधेयपुनराधेयाग्निहोत्रहोमानां क्रमः। तत्राग्न्याधेयपुनराधेययोः कंप्रपद्यादेरज्ञातस्यापठितत्वादग्न्याधेयपूर्वत्वाच्चाग्निहोत्रहोमस्य क्रमं भित्त्वा तृतीयाध्यायपरिपठितौ दर्शपूर्णमासौ श्रुतिक्रमेणैवाह।

---

१ A चाध्येषणार्थं पूर्वं चोदि॰ B चाध्येषणापूर्वं। २ A ins. चाप्येवं C चाप्येव।

१. वक्ष्यति पत्नीयजमानौ व्रतमश्नीयातामित्यादि । तत्पूर्वेद्युः कृत्वा ततः पौर्णमासेन हविषा यजते यजमानः । हविषेति जात्यपेक्षमेकवचनम् । यदनेन हविषाशास्त इति दर्शनात् । यद्दर्शपूर्णमासयोरुपवसति न ह वा अव्रतस्य देवा हविरश्नन्तीति श्रुतेः । यद्यपि श्रुतावाधानकर्म पूर्वमुक्तं तथापि पौर्णमासं प्रथमायै तन्त्रं भवत्यामावास्यं द्वितीयाया इत्यनेन दर्शपूर्णमासयोः प्राथम्यं दर्शितम्[1] । अतः सूत्रकारेण दर्शपूर्णमासौ प्रथमं सूचितौ ।

२. उपोष्य यजत इत्यर्थः । द्वयोरपि दर्शपूर्णमासयोरेक एवोपवासो मा भूदिति पृथक्सूत्रम् ।

३. द्वे एवेति नियमार्थ आरम्भः । अतोऽनयोरेव पूर्वोत्तरयोरुपदेशो न ज्योतिषामयनोक्तयोः । चातुर्मास्येषु चादीक्षितायनदाक्षायणयाजिनस्तिथिचयं प्राप्नोति । सांनाय्यस्य हि[2] द्व्यहकालत्वात् । तत्र हि संस्थितायां पौर्णमासमिति (३.१३.२८) वचनात्तथापि[3] कथं नाम द्वे एव पौर्णमास्यौ स्यातामिति नियमः । अतस्तत्र पूर्वस्यामैन्द्रस्य दोहः पयस्या दोहस्य । अन्यथा समाप्ते वैश्वदेवे स्यात्[4] ।

४. द्वे एव वक्ष्यमाणे ।

५. यां तिथिमुपवसतोऽस्तमयसमीपे पूर्णश्चन्द्रमा उदियात् । उत्सर्पेत् । यां चोपवसतोऽस्तमितमात्र आदित्ये चन्द्रमा उत्सर्पेत् । ते पौर्णमास्यौ वेदितव्ये । कैश्चित्सूत्रकारैः तिथिचयं पौर्णमासी-

---

१ B inserts घमः । २ हि om. in A; in marg. in C. ३ A तथापि । ४ C देव ।

संज्ञकमुद्दिष्टम्। ज्योतिषामयने च संवादादयं[1] लक्षणोद्देशः कृतः श्रुतिलिङ्गात्। पर्यस्तमयमस्तमित इति आदित्यविशेषणम्। कुतः। लोकप्रसिद्धेः। पूर्ण इति चन्द्रमसो विशेषणमन्यस्याव्यभिचारात्।

६. यः अनन्तरे आगामिन्यहोरात्रे न दृष्टा इति। एवं ज्ञातं केनचित्प्रमाणेन। भविष्यदनद्यतने। यदि चन्द्रो न भविता। यस्मिंस्त्वहनि वर्तमाने ऽदर्शनं चन्द्रमसः संभाव्यते ते अमावास्ये इत्युच्येते।

७. तत्र तस्मिन् पूर्णमासोदये अमावास्योदये च इष्यायां कर्तव्यायां कालं प्रति यथाकामी स्वेच्छया कर्ता स्यात्। ननु च पौर्णमासोदयोपदेशात् अमावास्योदयोपदेशाद्यजत इति वचनात्कर्तुर्यागकालं[2] प्रति स्वेच्छा सिद्धैव। किं सूत्रारम्भेण। उच्यते। अनारभ्यमाणे सूत्रे पक्षान्तेपक्षान्ते[3] द्वे इष्टी प्राप्नुतः कालस्योपस्थितत्वाद्यथाप्रतिमासम्।

८. वक्ष्यति व्याख्यातौ दर्शपूर्णमासौ प्रकृतिरिष्टिपशुबन्धानामिति। तत्र न ज्ञायते के दर्शधर्माः के पौर्णमासधर्मा इति। आवाहनादयश्च शब्दाः साधारण्येन पठिताः। तेषां सार्वकालानां मन्त्राणां प्रकृताविति यथापठितानां प्रयोगः प्राप्नोति। तद्विवेकार्थमिदमारभ्यते। हविर्विवेचनमित्यनुवर्तते। क्व प्रकृतं हविषा यजत इति। तत्र तृतीयैकवचनान्तं इह प्रथमाबहुवचनेन विपरिणम्यते। वक्ष्यति। उभयत्राग्नेयः पुरोळाशो अग्नीषोमीय उपांशुयाजो वैष्णवो वाग्नीषोमीयश्च पुरोळाशः पौर्णमासे हविरैन्द्राग्नो

१ A लिङ्गादयं। २ B देशाच्च यजत। ३ B पक्षान्ते only।

ऽसंनयतो द्वितीयो ऽमावास्यायामेवमाद्युपदेशाद्धवींषि व्यवतिष्ठन्ते। सिद्धमेवैतदुत्तरार्थं सूच्यते[1] ।

९. हविःसंयुक्ताश्च ये देवताशब्दा अग्नीषोमीयप्रभृतयस्ते चावा-हनादिषु यथोपदेशं भेदेन प्रयुज्यन्त इत्यर्थः। इति पौर्णमास्यामित्येव-मादेः सूत्रद्वयस्यापरो व्याख्यामार्गः। एतत्पौर्णमास्यामेतदमावास्यायाम् ईदृशादुपदेशाद्व्यवतिष्ठन्ते। असंकरेण भवन्तीत्यर्थः। ननूपदेशात्प्राप्तैव व्यवस्था। सत्यं। उच्यते। शाब्देनैव संयोगेन व्यवस्था भवति। नार्थेन। युक्ता चार्थेनापि व्यवस्था। सेह नेष्यते। शाब्देनैव व्यवस्था नियम्यते। यदि पुनरार्थेनैव व्यवस्था स्यात् ततो वत्सापाकरणसंयोगात्सांनाय्यपक्ष एव सत्यागनं प्रसज्येत। राकासिनीवाल्योस्तु राका पौर्णमास्यां स्यात् सिनीवाली अमावास्यायां यथासंख्ययोगात्[2] । अतस्तन्मा भूदिति सूत्रारम्भः। श्रुतौ च संयोगः पठितः। स च व्यवस्थाहेतुर्भवति। तत्संयुक्ताश्च शब्दाः। तदिति सर्वनाम्ना पौर्णमास्यमावास्ययोर्निर्देशः। पूर्वसूत्रेण शाब्दे संयोगे प्राप्ते वचनं प्राकरणिकसंयोगप्रापणार्थम्। पौर्णमास्यमावास्याप्रकरणसंयुक्ताः कंप्रपद्यादयो दर्शपूर्णमासयोरेव व्यवतिष्ठेरन् ननु सर्वार्था अनारभ्यवादा इति कृत्वा तत्र[3] को दोषः स्यात्। उच्यते। अप्राकृता भवेयुः। अतश्च प्रतिषेधो ऽर्थे (८.१.४.) इत्येवमादिभिर्न निवर्तेरन्।

१०. असंयुक्तं विधीयमानं साधारणमिति प्राप्ते असंदेहार्थं वचनम्। पूर्वयोर्योगयोस्तदपवादो मा भूदिति।

---

१ A ॰तदुत्तरार्थं सूत्रद्वयं वच्यते B C (by alt) ॰त्तरार्थं। २ C यथा॰ A यथासंयोगात्। ३ A om. तत्र।

११. उभयोः पौर्णमास्यमावास्याकर्मणोराग्नेयो ऽग्निदेवताकः पुरोलाशो भवति। उभयचेत्यधिकारार्थम्। पुरोलाशग्रहणं होतुर्नोपयुज्यत इति चेत्। उच्यते। उपयुज्यते। यथाग्नेयः पुरोलाशस्तथाग्निर्मूर्धा भुवो यज्ञस्येति याज्यापुरोनुवाक्यायुगलम्। यत्र पुनराग्नेयमाज्यं तत्र प्रायणीयादृष्टम्।

१२. उभयचेति वर्तते। अग्नीषोमीयदेवताक उपांशुयाजसंज्ञो यागो भवति। उपांशुधर्मकः। अनुपदिष्टस्यापि आज्यहविषो ऽनुपदेशो ब्रत्याशने आज्यभक्षणस्याप्रतिषेधार्थः।

१३. उभयचेति वर्तते। वाशब्दो विकल्पार्थः। विष्णुदेवत्यो वा उपांशुयाजो भवति। विष्णुरुपांशु यष्टव्यो ऽजामित्वायेति शाखान्तरात्।

१४. अग्नीषोमदेवत्यः पुरोलाशः पौर्णमासे हविषि भवति। हविःशब्देन कर्म लक्ष्यते। अतश्च पौर्णमासे कर्मणि भवतीत्यर्थः। चशब्द उक्तेन सह समुच्चयार्थः। ततस्तृतीयत्वं सिद्धं भवति। पौर्णमासग्रहणमुभयच मा भूत्। हविषीति वचनं पुरोलाशस्य पौर्णमासीविकारप्रापणार्थम्। ततश्च ऐन्द्रे पुरोलाशे पौर्णमासीविकारसिद्धिः।

१५. ऐन्द्राग्नः पुरोलाशः असंनयतः सांनाय्यमकुर्वतः। सांनाय्यमिति संस्कृते दधिपयसी उच्येते। तद्द्वितीयममावास्यायां हविर्विकल्पेन भवति। असोमयाजिनो ऽपीत्येतस्मादेव वचनात् ज्ञायते। यस्मिन्पक्षे एतन्न तस्मिन्नैन्द्राग्नो द्वितीयः। द्वितीय इति यथोद्दशा-

तात्पर्यं स्वाध्यायधर्मार्थतैव । अतो विकृतिषु लोपः । संप्रैषादिवचनं परिभाषितत्वात् । तेन यद्यपि हौत्रस्यानावृत्तिरुक्ता तथापि संप्रैष-वशादस्यानुवचनस्यावृत्तिर्यथा स्यादेवमर्थं संप्रैषवचनम् । जपो ऽपि संप्रेषितस्यैव[1] यथा स्यादेवमर्थं च ।

६. त्रिः सामिको हिंकारः कर्तव्यः । नासामा यज्ञो ऽस्तीति शतपथे । मकारहकारयोर्मध्ये ऽनुस्वार इति हिंकारलक्षणं छन्दोगानाम् ।

७. हिंकारं परस्वरेणासंहितं त्रिरुच्चार्य ततः प्र वो वाजा अभिद्यव इत्येतां प्राणमात्रसंहितां संदध्यात् । न तु [2]सांहितिकेन लक्षणेन । कुत एतत् । उपशब्दप्रयोगात् । मध्यमया वाचा । मध्यमेन स्थानेन । हिंकारो ऽपि मध्यमेनैव स्थानेन । कुतः । जपित्वेति [3]पूर्वत्र विशेषवचनात् । सामिधेन्यङ्गत्वाच्च हिंकारस्य । हिंकृत्य सामिधेनीरन्वाहेति । त्रिर्हिंकरोतीति श्रुतत्वात् । सामिधेन्य इति संज्ञा श्रुतिसिद्धैवेति न कृता ।

८. अग्न आ याहि वीतय इति तृचः । ईळेन्यो नमस्य इति तृचः । एवमेतौ तृचौ । ननु अग्न आ याहि वीतय इत्येका । ईळेन्यो नमस्य इति द्वौ तृचौ । एवं कस्मान्न भवति । उच्यते । यद्येवमभिप्रेतं स्यात् अग्न आ याहि वीतय ईळेन्य इति पठित्वैवं ब्रूयात् । एकादश सामिधेनीरन्वाहेति च श्रुतेः ।

९. एकारग्रहणं तृचाधिकारनिवृत्त्यर्थम् । ननु यद्येवमभिप्रेतं स्यात्पूर्वेण सह समासं कुर्यात् । उच्यते । तं वा एतं तृचवन्तं

---

१ C by alt प्रेषितः सन्ने । २ B सांहि॰ । ३ B पूर्वसूत्रे ।

इत्यमन्वाहेति शतपथे। पूर्वस्तृचो ह्यचलानयं तु नहिलचच इति समासो नाममात्रेण।

१०. उत्तरविवक्षार्थमेकेत्युक्तम्। आवापस्थानार्थं च।

११. यत्रयत्र सप्तदश सामिधेन्यः कर्तव्याः तत्रतत्र समिध्यमानो अध्वर इत्येतास्तिस्रोऽनुवक्तव्याः।

१२. साप्तदश्यमनारभ्याधीतम्। तयोस्तुल्यबलयोर्विकल्पे प्राप्ते साप्तदश्यमेभ्यः प्रतिषिध्यते। तत्साप्तदश्यं च सामिधेनीनां दर्शपूर्णमासादौ चितायनवर्जं प्रतीयात्। आयनाभ्यामिति समासो[1] वर्जनक्रियया सह योगात्। यत्पुनः परिभाषितं साप्तदश्यं च सामिधेनीनामिष्टिपशुबन्धेष्वितितश्चोदकानारम्भवादयोः[2] प्राप्तयोरनारम्भवादविहितं विकृतिषु साप्तदश्यं नियम्यते। यत्पुनरयनेषु पाञ्चदश्यं पठ्यते तन्मुन्ययनतुरायणयोर्विकल्पार्थम्। आग्रयणे त्वयनसंज्ञा न भवति। इति दर्शपूर्णमासायनानीति वचनात्।

१३. ता वै गायत्र्यो भवन्तीति स्वश्रुतौ। त्रिष्टुभश्च शाखान्तर एवमेव यथोक्ताः श्रुताः।

१४. आ जुहोता दुवस्यतेत्यस्यास्तृतीये वचने यः प्रणवस्तेनाग्ने महाँ[3] असि ब्राह्मण भारतेति संदध्यात्। उत्तमायां तृतीये वचने प्रणवेन निगदमुपसंदधातीति श्रुतत्वात्। सामिधेन्य आग्नेय्यः स चाग्निराहवनीय इध्मसमिन्धनद्वारेण स्तूयते। तं त्वा समिद्भिरङ्गिर

१ ०क्रियया A क्रिया B C। २ C in marg. पाकयज्ञचातुर्मास्य instead of प्राप्त। ३ C महं here and elsewhere.

इति विशेषविज्ञानम्। इत उत्तरेण चानुवचनशेषेण¹ स एव इध्यते। इयं वा इदं सर्वं छन्दस्कृतं चाछन्दस्कृतं च तेन सर्वेणाग्निं इन्धानीति श्रुतेः (कौ० ब्रा० ३.२)।

१५. अग्ने महाँ² असि ब्राह्मण भारतेति निगदस्यास्य प्रणवेन संधानवचनादार्षेयैः सह संधानम्। अमुतः परस्तादित्यर्थः। अर्वाग्घि अवरोहेणेत्यर्थः³। यजमानस्य न होतुः। त्रीणि नाभ्यधिकानि। आर्षेयाणि ऋषिनामानि। ते च ऋषयो ये यस्य यजमानस्य पूर्वे मन्त्रदृशो यावन्तो वा प्रतिगोत्रं स्मर्यन्ते। तदभिधायिनः शब्दा अण्प्रत्यययुक्ता⁴ आमन्त्रितविभक्तियुक्ताश्च उच्चारणीयाः। कुत एतत्। मानवेति प्रदर्शनात्। तद्यथा। वासिष्ठशाक्त्यपाराशर्येत्यादि। यद्यप्येतरेयिणामेकार्षेयस्याभ्यासेन त्रिसंख्यापूरणमुक्तमभ्यधिकसंख्यानां⁵ च समासेन तथापि यथा स्मर्यमाणान्येवोच्चारयितव्यानि। स्मरणस्य दृढत्वात्। ततश्चासंहितानि असमस्तानि च वक्तव्यानि। वासिष्ठादिभिः शब्दैरग्निरेवामन्त्र्यते। तथा हि वाक्यसंयोगः। यद्येवं कथं न ह वा अनार्षेयस्य देवा हविरश्नन्तीति (कौ० ब्रा० ३.२)। नैष दोषः। यजमानस्य हि वासिष्ठत्वादग्निर्वासिष्ठ इत्युच्यते। तेनोत्पादितत्वात्।

१६. त्रिगोत्रः क्रीतः स्वयमुपनीतादिः⁶। तद्यथा। शौनःशेप

---

१ A C in marg. विशेषेण। २ C महं। ३ A °रोहणेने(!) यस्य च देवैव एवमेव संधानम्। यथैनं पञ्चदशपदं निगदमुपसंदधातीति श्रुतेः। यजमानस्यार्षेयैः। यजमाना°। ४ अण्प्रत्यय° A अपत्यप्रत्यय° B C। ५ B °ना° A C °णा°। ६ B om. क्रीतः E. स्वयमागतेति C उपनयादिः।

आजीगर्तिः। ऋषिमन्त देवरातो वैश्वामित्रः। तुग्रब्दो वाग्रब्द-न्वार्थे। तथा च मनुः।

गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः क्वचित्।

गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥(९.१४२)

१७. अब्राह्मणस्य यजमानस्य यो होतेत्येवं मा विद्याचीति। यजमानाधिकारो ऽनुवर्तते। क्षत्रियादेर्यजमानस्य पुरोहितप्रवर-कीर्तनेनाग्निं ब्रूयात्। प्रवरग्रहणादार्षेसूक्तं स्वार्षेयेण भवति।

१८. मानव एवं वा सर्वेषां यजमानानां ब्रूयात्।

१९. देवेद्ध इत्येवमादिकं एतावन्न इत्येवमन्तं निगदस्थाणुमुक्त्वा विरमेत्। तस्य मन्त्र पदानि समस्यावस्येदिति (कौ० ब्रा० ३.२) श्रुतेः। देवेद्ध इत्यग्नेः स्वाभाविको गुणः। तेन पिण्ड्यायामनूह्यः।

२०. अथ चत्वारीति श्रुतेः। (कौ० ब्रा० ३.२)

२१. अथ चत्वारीति श्रुतत्वात्। वमसो देवपानो देवांश्च परिभूरसीति स्वाभाविकौ गुणौ। अतो न पिण्ड्यायामूहः।

२२. विग्रब्दो नानावाची। नाना विरमन् प्रतिवाक्यं देवता आवाहयति। अथ यद्यावयादं देवता आवाहयतीति श्रुतेः। आवाहयतीति स्वस्मनिर्देशाद्देवता इति च द्वितीयानिर्देशादस्याव-मन्त्रवाक्यार्थ उपवर्णितः। अतश्च यो ऽयं पूर्वप्रक्रान्त आहवनीयो ऽग्निः स एवाभ्येत। तत आहवनीयदिक्षे जपः सिद्धः।

५.

१. देवानिति पित्र्यायामनूहः सामान्यवचनात् । तथाकारस्य श्रुतिः प्राप्नोति चेत् । न । देवशब्देनाच धामाभावात् ।

२. यथाज्यभागयोरभावस्तत्र कथं नाम नैतौ शब्दावुच्येतामिति संज्ञाकरणम् । अग्न इत्येतदामन्त्रितमावाह्यानां प्रथमस्य पदस्य[1] भवतीति सवनीय आग्नेये श्रुतिपाठो ज्ञापकम् । अथावाहन आवह देवान्यजमानायाग्निमग्न आवह वनस्पतिमावहेति तथाज्यभागयोरभावे ऽप्यामन्त्रितप्रयोगात्[2] ।

३. अथ ये पौर्णमासीदेवतावाचिनः शब्दास्ते पौर्णमास्यां प्रयोक्तव्याः । नामावास्यायाम् । ये ऽमावास्यादेवतावाचिनः शब्दास्ते ऽमावास्यायां प्रयोक्तव्याः । न पौर्णमास्याम् । अर्थाभिधानेन मन्त्रा उपकुर्वन्ति नान्यथेति । तथा चोक्तम् । यथार्थं वा शेषभूतसंस्कारादिति जैमिनिना । अनेनाप्युक्तमेव । इति पौर्णमास्यामित्यमावास्यायामित्युपदेशाद्भवतिष्वन्ते तत्संयुक्ताश्च शब्दा इति ।

४. देवाँ आज्यपाँ[3] इत्यत्र नकारलोपः[4] । नकार आकारोपधः पदान्तो ऽपि स्वरोदयो लुप्यते (प्रातिशा ४, २६) इत्यादौ लक्षणस्य प्रदर्शितत्वात्[5] । यत्र वैश्वदेवं हविस्तत्र विश्वान्देवाँ आवहेत्येतेनाविरुद्धं भवति । पृषदाज्यपानिति पशौ प्राप्नोतीति चेत् । न । यच देवानामाज्यपानां प्रिया धामानीति प्रैषे ज्ञापकादनूहः ।

---

१ A om पदस्य । २ B चामन्त्रिताग्निशब्दप्रयोगात् । ३ C देवं आज्यपं । ४ B C om नकारलोपः । ५ A inserts प्रयाजानुयाजादेशादमान्तराभावे वा प्रतिषेधः । C ins. कृते ।

५. अथ यदग्निं होतायावाहयति स्विष्टकृतं तदावाहयतीति श्रुतेः। पिष्टायां कव्यवाहनविशिष्टे ऽग्नौ। अग्निं कव्यवाहनं होतायावहेत्यूहः।

६. ननु अथाकारस्य श्रुतिर्न प्राप्नोति। तस्य मन्त्रिणो यागाभावात्। उच्यते। यद्देव याज्याश्राह याज्या यजति तेनो हैवास्य स्वो महिमेष्टो (कौ॰ ब्रा॰ ३. ९) भवतीति यागानुप्रवादात् श्रुतो भवति।

७. शब्दस्वरूपप्रदर्शनार्थ इतिकरणः। तेनाथाख्याकारस्य श्रुतिर्नास्ति। समाप्तमनुवचनम्। वरुणप्रघासे आहवनीयौ द्वौ भवतः। तत्र यदाध्वर्युरग्निभ्यां समिध्यमानाभ्यामिति संप्रेष्यति ततः संप्रैषवशादूहः। स उच्यते। अग्नी महान्तौ स्वो ब्राह्मणौ भारतौ। चोदनासंदेहत्वात्प्रवरनाम्नामनूहः। देवेद्धौ मन्विद्धावृषिष्टुतौ विप्रानुमदितौ कविशस्तौ ब्रह्मसंशितौ घृताहवनौ। प्रणौ यज्ञानां रथ्यावध्वराणामतूर्तौ होतारौ तूर्णी हव्यवाहौ। आस्पात्रं जुह्वौ देवानां चमसौ देवपानावराँ इवाग्नी नेमौ देवान्युवां परि भुवौ स्थः। आवहतं देवान्यजमानाय अग्निमग्नी आवहतं सोममावहतं अग्निमावहतं सोममावहतं सवितारमावहतं सरस्वतीमावहतं पूषणमावहतं इन्द्राग्नी आवहतं वरुणमावहतं मरुत आवहतं कमावहतं देवाँ आज्यपाँ[१] आवहतं अग्निं होतायावहतं स्वं महिमानमावहतं आ च वहतं जातवेदसौ सुयजा च यजतम्।

८. उपविश्येति वचनमूर्द्ध्वजानुविशेषणार्थम्। दक्षिणेन प्रादि-

---

१ C देवं यान्यवं।

शेनेति उभाभ्यां मा भूत्। ननु एकवचनमप्यस्ति किं दक्षिणेनेति वचनेन । सत्यम्। अस्ति जातावप्येकवचनम्। अत उभाभ्यामेवेत्या-शङ्क्येत । भूमिमन्वारभ्येति वचनाद्बर्हिरपनीयेति गम्यते ।

८. अस्यै प्रतिष्ठाया मा छित्सि इत्येवमादिर्मन्त्रः । अस्मिन्मन्त्रे पञ्चदशेन वज्रेणेति सामिधेनीसङ्ख्याभिप्रायो विकल्पः । अतः साप्त-दश्ये सप्तदशेन । उपसत्सु नवकेन । एवं यावती सङ्ख्या तावतिथेन वज्रेणेति ब्रूयात् ।

६.

१. अमुकशर्मा होता मानुष इत्येवमध्वर्युणोक्तः । अस्मिन्नव-धाविदमाह ।

२. मानुष इत्येवमन्तेन मन्त्रेण प्रवृतः देव सवितरित्येव-मादिकं मन्त्रं जपति[1] किमर्थं मानुष इत्युक्तः प्रवृतो जपत्वित्यु-भयम् । उच्यते । प्रवृत इति वदन् प्रवरणनिमित्तत्वं जपस्य दर्शयति । पत्नौ च यजमानस्यापि प्रवरणमस्ति । सोमे च मैत्रावरुणादीनाम् । तेषामप्ययं मन्त्रो मा भूदिति विशेषवचनं मानुष इत्युक्त इति ।

३. उपोत्थाय तस्मिन्नेव प्रदेशे अध्वर्योर्दक्षिणमंसं दक्षिणेन प्रादेशेन अन्वारभ्य स्पृष्ट्वा सव्येन च वामहस्तप्रादेशेन आग्नीध्रस्य दक्षिणमंसमेवं युगपदन्वारभ्य इन्द्रमन्वारभामहे इत्येवमादिकं मन्त्रं जपति ।

४. वस्वोर्वीरित्येवमादिकं मन्त्रं अवसृज्य विसृष्टवाचौ जपति ।

---

१ A ins. जप ।

प्राप्तमेवैतत् । वाक्यार्थमुच्यते । किमुक्तं भवति । अध्वर्युं संप्रेष्य तिष्ठति (५.१५.६) इत्युक्तं[1] पयसोर्वीरिति अपित्वा तिष्ठति ।

५. ऐन्द्रीमावृतमित्येवमादिना मन्त्रेणावर्तते[1] । दक्षिणं बाहु-मन्विति बाहुवचनात्तत्रैव स्थित आवर्तते ।

६. आवर्तनादनन्तरं होतृषदनाच्छुष्कं तृणमादाय उभयतो मूलतो ऽग्रतश्च छित्त्वा ततो निरस्तः परावसुरित्येवमादिना मन्त्रेण निरस्येत् । दक्षिणापरं दिगन्तरालं प्रति । ननु छेदनक्रियया निरसनमन्त्रस्य किमर्थं व्यवधानं सूचितम् । उच्यते । समानं होत्रा तृणनिरसनमित्यत्र तदन्तर्भूतयोस्तृणादानच्छेदनक्रिययो-र्ग्रहणं यथा स्यादिति । अङ्गुष्ठोपकनिष्ठिकाभ्यां होतृषदनात्तृणमिति सूत्रान्तरम् ।

७. तृणनिरसनमन्त्र आभिचारिकस्तदुच्चारणे ऽस्मद्वचनाद-पामुपस्पर्शनं सिद्धम् । तदुच्यते । पित्र्यायां मन्त्रोत्सर्गे ऽपि यथा स्यात् । अवघ्राणं च वषट्कृत्योपस्पर्शनम् । उत्तरौष्ठ उत्तरमुप-स्पृशेत्येवमादौ यथा स्यात् ।

८. होतृषदनमिति प्रकृतं तृणमिति च । होतृषदने ऽशुष्कं तृणं निदध्यात् । शुष्काशुष्कविशेषणं शाखान्तरात् । स्वशाखायां तु प्रस्तरप्रकरणे । अथ यद्ब्रह्मसदनात्तृणं निरस्यति शोधयत्येवै-नत्तत् इति (कौ० ब्रा० ६.१२) अविशेषेण[3] शोधनश्रुतेः ।

९. होतृषदनाधिकारो ऽनुवर्तते । होतृषदन उपविशेत् ।

---

१ A C वर्ता । २ A inserts दक्षिणं बाहुमन्वा० । ३ C om. अवि ।

इदमहमर्वावसोरित्येवमादिना मन्त्रेण । जपादिनिर्देशः कर्मार्थः । सौदामौति मन्त्रवर्णादुपवेशने सिद्धे उपविश्येति वचनं श्रोत्रपदस्य उपवेशनार्थम् । इतरथा ऊर्ध्वजानुरुपविशेत् तथा दृष्टत्वात् ।

१०. उपस्थ उत्सङ्गः । उपेत्य यस्मिन् पुत्रादयस्तिष्ठन्ति । स च सम्यग्जानोरुपविष्टस्य[१] भवति । तं दक्षिणोत्तरिणं दक्षिणावयवोत्तरं कृत्वा प्राञ्चौ पाणी प्राचीं दिशं प्रत्यञ्चितौ प्रगुणाङ्गुली प्रसृतौ हस्तसंपुटं कृत्वा । यद्यप्येवमेव परिभाषितं तथापि लोके ऊर्ध्वावपि पाणी संपुटीकृतौ क्रियेते । तन्निवृत्त्यर्थं प्राञ्चाविति ।

११. नमो द्यावापृथिवीभ्यामिति मन्त्रं पठन् गार्हपत्याहवनीयावीक्षेत ।

१२. उदग्गच्छन्नेव वामाकाश इति पठेत् । आहेति ब्रुवन्[२] दर्शयति नायं जपः । अतश्च पित्र्यायामनुत्सर्गः ।

१३. विश्वे देवा इति यद्यपि सूक्तादिस्तथाप्येकां प्रतीयादन्वचेति वचनादेका । तदन्ववाचः प्रथमं मन्त्रीय । नमो महद्भ्यो नमो अर्भकेभ्यः । अत्र प्रथमोत्तमयोर्न विवचनम् । न चैकवचनम् । मन्त्राश्च जपेभ्य इति (१.१.१८) वचनात् ।

१४. [३]अवसायेत्युचावाच्यम् उत्तरवोपांशुत्ववचनमुच्चैरुपांशुत्वयोः[४] संततासंभवादिति चेत् । न । सर्वोपांशुत्वे संभवो [illegible] ।

---

१ A C जान्वोः । २ A स्तदेव इत्य॰ । ३ A inserts into the text of the Sûtra after चोचं the following words मं । कृपादापनादि मन्त्रीति दर्थे भाष्यकारैरपरादिष्टादौ अनुरमनाताकारैर्व्याख्यात इतः यजमानाद्विद्यते । ४ A ॰शुवचनादुच्चैरुपांशुवचनयोः ।

तच संधानं मा भूदित्युच्यते सर्वथापेति । अथ द्वियजमानके बहु-यजमानके च ऊहः प्राप्नोति । स उच्यते । साधु वां यजमानौ देवता । साधु वो यजमाना देवता । पित्र्यायां च । अग्निः कव्यवाहनो होता[1] वेत्वग्निः कव्यवाहनो होत्रं[2] वेत्तु प्राविचं साधु ते यजमान देवता ।

१५. चतुर्थेरित्यर्थः । तचापि द्वियजमानके । यावग्निं होतारमवृणाथाम् । बहुयजमानके । ये ऽग्निं होतारमवृणीध्वं । पित्र्या-याम् । यो ऽग्निं कव्यवाहनं होतारमवृथाः । एवमूहः कर्तव्यः ।

१६. घृतवतीमित्येवमादिना मन्त्रेणाध्वर्युः स्रुचौ ग्राहयित्वा ततः पञ्च प्रयाजान्यजति । स्रुचावादायेति वचनं स्रुगादापनसंज्ञा-र्थम् । स्रुचाविति द्विवचनं विवक्षितम् । अत एकस्रुक्के नायं मन्त्रः । वरुणप्रघासेषु स्रुग्बहुत्वे ऽपि भवति । उत्तरस्यां वेदौ होतृकर्मेति (२.१४.१५) वचनात् । अत एवाध्वर्युपदस्यानूहः । आदायेति क्त्वा निर्देशो ऽङ्गाङ्गिसंबन्धज्ञापनार्थम् । अतः प्रयाजानुयाजाभ्यां परिचाय्येत्येवमादौ (८.२५.२) नायं भवति । ईलामहै देवानिति पित्र्यायामनूहः । सर्वथास्यार्थस्याविशेषात् । तथा च शतपथे । मनुष्या वा ईलेन्याः पितरो नमस्या देवा यज्ञिया इति । यजेति कर्मभेदार्थम् । अतः प्रयाजानामन्तरालेषु होतुर्न वाग्यमः । द्विगो-र्यत्रापि पञ्चैव न षट् । प्रयाजानिति शास्त्रसंव्यवहारार्थम् । पञ्च यजति इति नियमात् । द्विगोश्च समस्य यागः । ध्याताप्सुमे वाचिकप्राख्यार्थमेः श्रुतेरिति दर्शनात् ।

---

[1] C om. होता । [2] C om. होत्रं ।

ॐ

१. समिधः समिधो अग्न आज्यस्य व्यन्त्वित्यनया च इज्यते स प्रथमः प्रयाजः। आग्नेयाः प्रयाजाः। सौचीकश्चात्राग्निः। प्रयाजांश्चानुयाजांश्च केवलानिति लिङ्गात्। अतश्चाहवनीयः। तेनाहवनीयविकारे ऽप्यत्राग्निपदस्यानूहः। ननु होतृविशिष्टोऽग्निः स्विष्टकृत्। कथमेतत् ज्ञायते। अथ यदग्निं होतारमावाहयति स्विष्टकृतं तदावाहयति तथा नामाग्निं होतारादित्याह पशवो वै प्रयाजा रुद्रः स्विष्टकृदिति श्रुतेः (कौ० ब्रा० ३. ३. ४)। अयं च सौचीको होतृविशिष्टः। होतारं त्वं वृणे विश्वदायमिति लिङ्गात्। ततः पित्र्यायां कव्यवाहनेत्यूहः प्राप्नोति। उच्यते। अन्य एव कव्यवाहनो ऽग्निर्न सौचीकः। कथं ज्ञायते। मन्त्रवर्णात्। यो अग्निः क्रव्यात्प्रविवेश वो गृहमिमं पश्यन्नितरं जातवेदसम्। तं हरामि पितृयज्ञाय देवमिति तस्माद्व्यपदेशादन्यः कव्यवाहनः। अतः पित्र्यायामनूहः। प्रथमग्रहणस्य प्रयोजनमुच्यते। इति प्रयाजयाज्या (१.७.६) इत्यत्रेतिकरणः प्रकारार्थः। एवंप्रकाराः प्रयाजयाज्या इति। किमेवं सिध्यति। उच्यते। केषांचिदभ्यूर्णां मित्रविन्दा दशप्रयाजा। तत्र त्वष्टा अनियतस्थानः। तस्य प्राथम्यं मा भूदिति प्रथमवचनम्।

२. तनूनपादग्न आज्यस्य वेत्वनया[1] द्वितीयः प्रयाजः। द्वितीय इत्यपि वसिष्ठादीनामयं चोत्तरश्च विकल्पेन।

३. नराशंसो अग्न आज्यस्य वेत्वनया वाऽनया द्वितीयः प्रयाजो

---

१ A ins. द्वितीयया।

भवति। वसिष्ठादीनाम्। यद्यपि द्वितीय इत्यनुच्यमाने पूर्वेण सह विकल्पः स्यात्। वसिष्ठशुनकानां नराशंसोऽत्रीणां चैक इति कात्यायनवचनात्। अत्रीणां नराशंसो विकल्पः। तैः सह समासो वध्र्यश्वानां विकल्पार्थः। कण्वानां तनूनपान्नराशंसावुभौ पठ्येते। तत्र पक्षे समुच्चयः। पक्षेऽन्यतरेण प्रयोगः। तथैव संकृतीनामपि यथा स्यादेवमर्थः समासः। राजन्यानामसमासात्पूर्वेषां समासे तुल्य-धर्मता सिद्धा। अतश्च यथोक्तोऽर्थः।

४. इळो अग्न आज्यस्य व्यन्त्वित्येतया याज्यया तृतीयः प्रयाजो भवति। येषां तनूनपान्नराशंसावुभावाम्नातौ तेषामुभयोर्भिन्ना-भिन्नयोः पाठसामान्यात् प्रयोग आप्नुवन्ते[1]। तन्निवृत्त्यर्थं तृतीय-वचनम्।

५. बर्हिरग्न आज्यस्य वेत्वित्यनया याज्यया चतुर्थः प्रयाजो भवति। चतुर्थ इति संव्यवहाराय संज्ञा। वक्ष्यति। चतुर्थमन्त्रा-वन्तरेण चत्वार (३.१३.१८.) इति। तथास्य पञ्चमं यथा स्यात्।

६. स्वाहाग्निमित्येवमादिकया याज्यया उत्तमः प्रयाजः। व्यवस्था तु देवतापदानां चोदनोपदेशात्। अग्नेर्होतुः सोमस्य च मद्वियो निगमप्रतिषेधार्थं[2] अवयवप्रतिषेधार्थं च दण्डकपाठः। आचारस्नुहल्लात्प्राप्नोति[3]। अन्वयस्य प्रकृतिरित्याश्वेति वचनात् (१.१६.२)। इति प्रयाजयाज्याः। इतिशब्दः प्रकारे। ततो

१ A B C आप्नुवन्ते। २ A निगम B निगम॰ C निगदम॰। ३ B आचरणी॰ ॰ष्टाच्छि।

मित्रविन्दायां त्वष्टा अग्न आज्यस्य वेतु इति नवमो दशमो वा शाखान्तरात्। स्वाहा देवा आज्यपा जुषाणा अग्न आज्यस्य व्यन्त्विति हैक आहुः। अस्य[1] प्रतिषेधार्थं इति प्रयाजयाज्या इति नियमवचनम्।

८.

१. अग्निर्वृत्राणि जङ्घनत् त्वं सोमासि सत्पतिरित्येतावाज्यभागौ पौर्णमास्यां भवतः। अथ यत्पौर्णमास्यां वार्त्रघ्नावाज्यभागौ भवत (कौ० ब्रा० ३.५.) इति श्रुतेः। अनुदेशेनाज्यभागसंज्ञा। ततः श्रूयमाणं प्राकृतं नामधेयमन्यस्मिन्द्रव्ये प्रकृतिं निवर्तयतीति (८.१.३) सदन्तावाज्यभागौ इत्येवमाद्युच्यमाने अनयोरेव निवृत्तिर्भवति। यद्यपि सामान्यान्नियम (१.१६.१८) इति सिध्यति तथाप्येवं सति प्रतिपत्तिगौरवं स्यात्। वार्त्रघ्नावितीयमनुगता संज्ञा। ततः सर्वकामिष्ट्यां केषांचिदेव तावन्यावाज्यभागौ[1] भवतः। पाप्मोपघाते सति कामो लभ्यते। अभिचारे च। तत्र हन्तेरर्थवत्त्वात्। शुनासीरीयायामिष्टौ च। तत्रापि पाप्मा वै वृत्रो यो भूतेर्वारयित्वा तिष्ठति कल्याणात्कर्मणः साधोरिति श्रुतेः[2]।

अभिशस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव वा।
निर्वपेत पुरोडाशं वायव्यं पशुमेव च॥

इत्येवमादौ शुद्ध्यर्थे वार्त्रघ्नौ भवतः। अन्वर्थसंज्ञाविज्ञानात्।

---

१ B inserts इति after आहुः Cf. कौ०ब्रा० ३. ४। १ A ०चिदेतावाज्यभागौ।
२ शतपथब्रा० ११. १. ५. ७।

२. अग्निः प्रत्नेन मन्मना सोम गीर्भिष्ट्वा वयमित्येतावमावास्यायाम् । आमावास्ये कर्मणि । वृधन्वन्ताविति संव्यवहारार्थं संज्ञा । अन्वर्थसंज्ञा च । तत्र चर्षिण एते एव । पुरोनुवाक्याग्रहणं च न[1] कृतं याज्यासंनिधिसिद्धेः ।

३. आग्नेयसौम्ययोर्यथासङ्ख्येन ।

४. अग्निर्मूर्धा दिवः ककुदित्याग्नेयस्य पुरोलाशस्य पुरोनुवाक्या । अग्नेरिति नोक्तं पुरोलाशस्यैवैतौ यथा स्याताम् । ततो हविर्यज्ञसोमेषु पुरोलाशानामेवैते भवतः । पशुषु तु विपर्यासः कर्तव्यो यातयामत्वदोषात् ।

५. भुवो यज्ञस्य रजसश्च नेता एषा याज्या । आग्नेयस्येति वर्तते ।

६. अग्नीषोमाविमं सु मे एषा उपांशुयाजस्य पुरोनुवाक्या भवति । यथा पूर्वत्र तद्धितेन निर्देशस्तथेह[2] न कृत उपांशुयाजचोदनायामेव भावार्थम् ।

७. उपांशुयाजस्य जुषाणाविल्येवमादिका याज्या ।

८. इदं विष्णुर्वि चक्रमे पुरोनुवाक्या । वषट् ते विष्णवास आ कृणोमीति याज्या । वैष्णवस्योपांशुयाजस्य । तद्धितनिर्देशो नियमार्थ इत्युक्तम् । अत्र पुरोनुवाक्या याज्येति नोक्तम् । पूर्वत्र द्विरुक्तं पारिभाषिकमिति न्यायः सिद्धः । अतः प्रतीकग्रहणं याज्यापुरोनुवाक्यानामिति (१.१७.१) अविशेषे सत्यपि पूर्वा पुरोनुवाक्या ततो याज्या ।

९. वैष्णवस्येति वर्तते । जुषाणो वा निगदो वैष्णवस्य याज्या-

---

१ A B C om. न । २ A निर्देशश्चितः ।

त्वेन भवति। कथमेतत् ज्ञायते याज्यात्वेन भवतीति। नन्वयं विकल्पः पूर्वेण याज्यानुवाक्यायुगलेन युक्तः। नेत्युच्यते। एकत्वाल्लिङ्गस्य याज्यात्वेन च दृष्टत्वात् याज्यात्वमध्यवसीयते। अथाग्नो विष्णुराज्यस्य हविषो वेत्वित्येवं प्रयोगः सामर्थ्यात्।

१०. अग्नीषोमा सवेदसा पुरोनुवाक्या। युवमेतानि दिवि रोचनानीति याज्या। कस्य। अग्नीषोमीयस्य पुरोडाशस्य। पुरोडाशस्तद्धितवाच्यस्तस्य चोक्तं प्रयोजनम्।

११. इन्द्राग्नी अवसा गतं पुरोनुवाक्या। प्र चर्षणिभ्यः पृतना हवेषु याज्या। तद्धितनिर्देशः पुरोडाशाभिधायी उक्तप्रयोजनः।

१२. एन्द्र सानसिं रयिं पुरोनुवाक्या। प्र ससाहिषे पुरुहूत शत्रून् याज्या। इति सांनाय्यस्य। सांनाय्यस्येति वचनं नियमार्थम्। अतो नान्यस्येन्द्रस्य[1] हविषः।

१३. महाँ इन्द्रो य ओजसा महाँ इन्द्रो नृवदा चर्षणिप्रा इत्येते याज्यानुवाक्ये माहेन्द्रस्य सांनाय्यस्य।

१४. इन्द्रं वो विश्वतस्परि पुरोनुवाक्या। मादयस्व हरिभिर्ये त इन्द्रेति याज्या। एते याज्यानुवाक्ये इन्द्रस्य न महेन्द्रस्य। किंविशिष्टस्येन्द्रस्य। अप्रतिनिधेः। कीदृशः प्रतिनिधिः कीदृशो वाप्रतिनिधिः। उच्यते। यः कस्यचित् स्थाने सादृश्येन भवति स प्रतिनिधिरित्युच्यते। तद्यथा। अयमेवामावास्यायामिन्द्रश्चन्द्रमसः प्रतिनिधिः। कथमेतत् ज्ञायते। इन्द्रश्चन्द्रप्रतिनिधिरिति

१ A om. इन्द्रस्य।

श्रुत्यर्थवादात् । अथ यदमावास्यायामिन्द्रं यजत्येतज्ज्योतिर्वा अमावास्या न ह्यत्र चन्द्रो दृश्यत (कौ० ब्रा० ३. १) इति । किमेतेन सूत्रेण सिद्धम् । चरुः सांनाय्यालाभे सायंदोहस्थाने वा पुरोळाश इत्येवमादौ एन्द्र सानसिं रयिं प्र ससाहिष इति याज्यापुरोनुवाक्ये सिद्धे भवतः । कथं नामाप्नुतः । सांनाय्यस्येति नियमात् । अतो ऽप्रतिनिधेरिति देवताविशेषणत्वादैन्द्रं पञ्चशरावमोदनं निर्वपेत्पुरोळाशं वेति भेदेनाप्युपपातात्तत्प्रतिनिधिः प्रायश्चित्तं[1] वेति । यथास्तु तथास्तु । एन्द्र सानसिं प्र ससाहिष इत्येते[2] भवतः । ननु दृष्टचन्द्रायां प्रतिनिधिकार्याभावात् नैते प्राप्नुतः । उच्यते । सांनाय्यस्येति वचनाद्भविष्यत इति । अमावास्याव्यतिरेकेणैन्द्रस्य हविषः सांनाय्यवर्जितस्य इन्द्रं वो विश्वतो मादयस्व हरिभिरित्येते याज्यानुवाक्ये भवतः । सत्त्रविषये तु यः कात्यायनपठित ऐन्द्रः पञ्चशराव ओदनो वा[3] तस्यामावास्यायामपीन्द्रं वो विश्वतो मादयस्व हरिभिरिति[4] । तत्र हि सत्यासंभवात् । ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्पुरोळाशं वा यद्योदनीयन्ति यद्यपूपीयन्तीति श्रुतेः (कात्या० १२. २. १२)। यदि यजमाना बुभुक्षया ओदनमिच्छन्ति यदि पुरोळाशमिच्छन्ति तत ऐन्द्रः पञ्चशराव ओदनो वा[5] । अतो ऽसौ न चन्द्रप्रतिनिधिः ।

---

१ कात्या० २५. ४. १—५ । २ B adds तु । ३ B in marg. पुरोळाशो वा । ४ B एते । ५ B adds पुरोळाशो वा ।

९.

१. पिप्रीहि देवाँ उशतो यविष्ठ एषा स्विष्टकृतः पुरोनुवाक्या भवति । पुरोनुवाक्याग्रहणं निगदव्यपेतत्वादृचः संदेहव्युदासार्थम् ।

२. अत्र प्रयोगः । ये यजामहे ऽग्निं स्विष्टकृतमिति । किं कारणम् । अथ यदग्निं स्विष्टकृतमन्ततो यजतीति श्रुतेः । प्रैषे च तथा दृष्टम् । होता यक्षदग्निं स्विष्टकृतमिति । तथा च संप्रैषः । अयाळग्निरिति पदद्वयस्यार्थः इष्टवानग्निर्वक्ष्यमाणा देवताः स्विष्टकृदभिधानं चैतत् । कुतः । एष ह वै देवेभ्यो हविः प्रयच्छतीति श्रुतेः । अतश्च स्विष्टकृद्विकार ऊहः । तद्यथा पित्र्यायाम् । ये स्वधामहे ऽग्निं कव्यवाहनमयाळग्निः कव्यवाहन इति । अवमाननियमार्थो दण्डकपाठः । तद्ध्येके देवतां पूर्वां कुर्वन्त्ययाड्ढारादिति । तद्व्युदासार्थश्च दण्डकपाठः । अनुयाजवदप्रयाजमुदयनीयं तैत्तिरीयाणाम्[1] । अतश्च तेषामुदयनीये प्रयाजा न सन्ति । अनुयाजास्तु विद्यन्ते । तत्र भविष्यत्स्वप्यनुयाजेषु अयाड् देवानामाज्यपानां प्रिया धामानीत्येवमेव प्रयोगः । अयाळिति लुङ्छन्दसि कालत्रये ऽपि विधानात् । अग्नेः कव्यवाहनस्य होतुः प्रिया धामानीति पित्र्यायामूहः । जातवेदा इति गुणपदं वरुणस्यापि तुल्यम् । अतश्चावभृथे ऽप्यूहः । ये यजामहे ऽग्नीवरुणावयाष्टामग्नीवरुणावग्नेः प्रिया धामान्ययाष्टां सोमस्य प्रिया धामान्ययाष्टां वरुणस्य प्रिया धामान्ययाष्टां देवानामाज्यपानां प्रिया धामानि

---

१ B adds कर्म ।

यजतामग्नीवरुणयोर्होचो: प्रिया धामानि यजतां स्वं महिमान-मायजतामेज्या इष: कृणुतां तावध्वरौ जातवेदसौ जुषेतां हविरित्यूह:। अग्ने यदद्य विशो अध्वरस्य होत: एषा सह निग-देन याज्या।

२. वषट्कृत्येति क्त्वाप्रत्ययो ऽङ्गार्थतां स्विष्टकृतो ज्ञापयितुम्। अतो ऽन्यचापि यत्रयत्र स्विष्टकृदर्थवादस्तत्रतत्र वषट्कृत्योपस्पर्शनम-पाम्। अप उपस्पृश्येत्यन्वयदृष्टत्वात्। अथ यदप उपस्पृशति शान्तिर्वै भेषजमाप: शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियत (कौ० ब्रा० ३.६.) इति श्रुते:।

१०.

१. इलोपह्वानं करिष्यत:। भाविनीलोपह्वान इत्यर्थ:। पाणे-र्दक्षिणस्य या प्रदेशिनी अङ्गुष्ठादनन्तराङ्गुलिस्तस्यां प्रदेशिन्याम-नक्ति सञ्चयत्यध्वर्यु:[1]।

२. उत्तमे च पर्वणि मध्यमे च। तस्या एव प्रदेशिन्या द्वे स्थाने अध्वर्युणाभ्यक्ते। तयोर्यत्पूर्वं तद्वाचस्पतिना ते हुतस्य प्राश्ना-म्योषे प्राणायेत्यनेन[2] मन्त्रेणाधरौष्ठे निलिम्पेत्। यद्द्वितीयमञ्जनं तन्मनसस्पतिना ते हुतस्य प्राश्नाम्यूर्ज उदानायेत्युत्तरौष्ठे निलिम्पेत्। आध्वर्यवस्याङ्गुलिपर्वाञ्जनस्योपदेशो निराकाङ्क्षार्थ:।

---

१ C ग्र० A यजमानस्य०। २ B प्राणायेति पर्वमञ्जनमधरौष्ठे।

३. अपामुपस्पर्शनं कृत्वा ततो ऽन्यत्। शाखान्तर एवमेव विहितत्वात्।

४. दक्षिणेन हस्तेन उत्तरेळां धारयन्। इळामुपह्वयत इति संबन्धः। उत्तरेळाग्रहणं शास्त्रसंव्यवहारार्थम्। उत्तरेळां प्राश्नेत्येवमादिषूपस्थितं द्रष्टव्यम्।

५. धारयन्निळामुपह्वयत इति संबन्धः। असंकुचिताङ्गुलिना दक्षिणेन पाणिना उत्तरेळां धारयति। मध्येनेळापात्रीम्। सव्येन होतृचमसं च पात्रीं च संयच्छतीति सोमे दर्शनात्।

६. क्रमार्थं वचनम्। हस्तेन चत्वार्यवदानान्यध्वर्युर्ददाति। पञ्चमं होता स्वयं गृह्णीयात्।

७. अपिल्विळामुपह्वयत इति संबन्धः। स्वयमित्यप्यत्रोपयुज्यते। आत्मनो मुखसंमितां हृदयसंमितां वा। न यजमानस्य। धारयन् किं करोतीत्यत आह।

११.

१. उपहूतं रथन्तरमित्येवमादिकं जपं अपिल्विळामुपह्वयते। अपिल्विति वचनादुपांशुप्रयोगः। अनेकस्वर्यं च।

१२.

१. इळोपहूतेत्येवमादिस्तस्मिन्नुपहूत[1] इत्येवमन्तो निगद इळोपह्वानसंज्ञस्तेनोपह्वानं कृत्वा।

---

१ B °त्येवमादिमन्त्र°।

२. अनन्तरमिडां जिघ्रेत् ।

३. अन्तरिडं इडामध्ये इडोपह्वानसंज्ञकस्य निगदस्य[1] मध्ये चतुरवानिति उच्छ्वसिति । तत्र मैत्रावरुणीति प्रथम उच्छ्वासो निराकाङ्क्षत्वात्[2] । वर्धानिति द्वितीय उच्छ्वासः । पुत्रे इति तृतीयः । अन्ते चतुर्थः ।

४. यदा इडामध्ये चतुरवाननं तदा ब्रह्म देवकृतमुपहूतमिति द्वितीयः । यज्ञपतिशब्दस्यानेकयजमानके ऽप्यनूहो देवताभिधानमिति संदेहात् । उपहूताविमौ यजमानौ द्वियजमानके । उपहूता इमे यजमाना इति बहुयजमानके । सर्वस्वार (१५. १०. १) उत्तरस्यां देवयज्यायामित्यस्यानुत्सर्गः[3] । अस्थियज्ञे तु दीक्षणीयापुरुषसंस्कारामीर्वर्जमिति कात्यायनवचनात्सर्वाग्निषामभावः (२५. १३. ४३) । अपरे पुनः [4]क्रतुवैगुण्यभयात्प्रयोगमिच्छन्ति ।

५. इडामीत्येवमादिना मन्त्रेणोत्तरेडां संप्राश्य भक्षयित्वेत्यर्थः । क्रमार्थः क्त्वाप्रत्ययः ।

६. इतरा या पात्र्यामस्ति तां यजमानपञ्चमा ऋत्विजः प्राश्नन्ति । यजमानो ब्रह्मा होताध्वर्युराग्नीध्रश्चेति वाजिने पठिताः । पञ्चैव । न मैत्रावरुणः प्रतिप्रस्थाता वा । प्राश्येत्यनुवर्तमाने पुनर्वचनं मन्त्रप्रतिषेधार्थम् ।

७. भक्षणानन्तरं तावद्वाग्यमो होतुर्यावन्मार्जनं न[5] कृतम् । ब्रह्मयजमानयोस्त्वन्यत एव वाग्यमः सिद्धः ।

---

१ B om. निगदस्य । २ A ins ब्रह्म देवकृतमुपहूत इति द्वितीय and alters द्वितीयः । तृतीयः to तृतीयः । चतुर्थः resp. । ३ A ०स्योत्सर्गः । ४ C ऋतु० । ५ B C (orig.) om. न ।

८. इदमाप प्र वहतेत्यादिना ऋचेन यथाम्नायपठितेनोपांशुप्रयोगेण मार्जयन्त इडाभक्षयितारः। इडाङ्गत्वान्मार्जनस्य। मार्जनं मूर्धन्यवसेको ऽभ्योक्तत्वात्। अद्भिश्च मार्जनं शान्तिर्वै भेषजमाप इति लिङ्गात्[1]। अन्तर्वेद्यवस्थिते पवित्राभ्यां संयुक्ते पात्रे। पवित्रवतीति मतुप्निर्देशाद्गुणभूते पवित्रे। अतस्तदभावे ऽपि पत्नीसंयाजनेषु मार्जनम्।

९. कृते मार्जने पवित्रप्रतिपत्त्यनन्तरमध्वर्योर्भागपरिहरणं[2] स्मृतिविहितम्। तदस्माकमवधित्वेनोपदिष्टम्। यजमानभागस्याप्यत्र परिहरणमस्त्येव। न तु प्रोषिते। ब्रह्मणस्तु सर्वदा भवतीति सर्वत्र निर्दिष्टम्[3]। एतस्मिन्नवधावन्वाहार्यसंज्ञकमोदनं दक्षिणाग्निपक्वमाहरन्ति। बहुवचनमविवक्षितम्। अवधित्वेनोद्दिश्यमानत्वात्।

१०. यास्वपीष्टिषु भागपरिहरणमन्वाहार्यहरणं च नास्ति तास्वप्येष एव दक्षिणाकालः। सर्वासामिष्टीनामिति वचनात्। न तु पशौ सत्यपि भागपरिहरणे।

११. आदिष्टदक्षिणास्वन्वाहार्यो न भवति। आदिष्टदक्षिणा आग्रयणमित्रविन्दाप्रभृतयः।

१२. एषा न इत्येवमादिना मन्त्रेण समिधमाग्नीध्रप्रक्षिप्तां होतानुमन्त्रयते। अनेकस्वर्यमुपांशु च प्रयोगः। अथ यत्समिधमनुमन्त्रयत इध्मस्य वा एषैकातिशिष्टा भवति। तस्मादेनामनुस्तौतीति (कौ० ब्रा० ३.७) श्रुतेः। यदीध्मानुवचने ऊहस्ततो ऽत्रापि।

---

१ A C (sec. h.) वचनात् instead of लिङ्गात्। २ A C om परि। ३ B सर्वत्र भवतीति नि॰ C has सर्वदा in marg।

स उच्यते। एते वामग्नी समिधौ ताभ्यां वर्धेथां चा च प्यायेथाम्। अनुमन्त्र्येति क्त्वाप्रत्ययो ऽनुयाजाङ्गप्रज्ञापनार्थः।

१३. त्रीननुयाजसंज्ञकान्वक्ष्यमाणान्यजति याज्याधर्मेण पठति। त्रिग्रहणं कर्मत्रयप्रदर्शनार्थम्[1]। अनुयाजानिति शास्त्रसंव्यवहारार्थम्।

१३.

१. अयं प्रथमो ऽनुयाजः।

२. अयं द्वितीयः।

३. विरम्येत्यर्थः।

४. इति एता एव[2] सर्वत्र। ततः पित्र्यावभृथयोरनूहः। न च तनूनपान्नाराशंसिनो विकार इतीतिकरणस्य[3] नियमार्थत्वात्।

१४.

१. अध्वर्युणा सूक्ता ब्रूहीत्येवमन्तेन निगदेन संप्रेषितो वक्ष्यमाणं सूक्तवाकमाहेति वाक्यशेषः। ननु संप्रेषितो ऽन्वाहेति परिभाषितमेव। सत्यम्। निमित्तार्थस्तु संप्रेषपाठः। सामिधेनीसंप्रेषवत्। वक्ष्यति। अप्रत्तदैवते दृष्टे नावृत्तिरस्ति होतुः। तथा नावृत्तिः प्रत्तदोषे ऽस्ति। अत्र होत्रावृत्तिप्रतिषेधे ऽपि[4] संप्रेष आवृत्तेर्निमित्तं भवति। ततः संप्रेषवशादावृत्तिर्भवति।

२. अग्ने त्वं सूक्तवागसीत्येवमन्तं निगदखण्डमुक्त्वा विरमेत्।

[1] C om च। [2] A एताश्च। [3] A विकार इतिक०। [4] C ins इति।

३. यजमान द्यावापृथिवी स्तामित्येवमन्तं निगदखण्डमुक्त्वा विरम्य ततो ऽनन्तरम्।

४. अभयंकृताविस्येवमन्तं निगदखण्डमुक्त्वा विरम्य ततो ऽनन्तरम्।

५. तयोराविदीत्येवमन्तं निगदखण्डमुक्त्वा विरम्य ततो ऽनन्तरम्।

६. अवचने ऽप्यवमानं वाक्यपरिसमाप्तेः। एवमुत्तरेष्वपि द्रष्टव्यम्।

७. हविरजुषतेति हविःशब्दः प्रायेण प्रधानवाची दृष्टः। तदाशङ्कया उदर्कस्यापि पाठः। अग्निरिदमिति च केषांचित्। तन्निवृत्त्यर्थं च दण्डकपाठः। स्वस्य च महिम्नः प्रतिषेधार्थम्।

८. प्रधानहविर्निगमनम्। उक्तं दण्डकपाठप्रयोजनम्।

९. अकातामित्यन्यत्रापि। द्विदेवत्य एवमेव यथा स्यादिति सकलपाठः। ननु कीदृशो ऽन्यथा प्राप्नोति। उच्यते। अक्षाताभिति। किं कारणम्। ऊहस्याच्छान्दसस्मरणात्। अक्रातामिति तु च्छान्दसम्।

१०. यथेष्टं व्यवस्था।

११. पूर्ववद्विचारः।

१२. यथेष्टं व्यवस्था।

१३. यथेष्टं व्यवस्था।

१४. अत्रापि अकतेत्येवमेव बहुदेवते नियमो[१] यथा स्यात्। अक्षपतेति लाक्षणिको मा भूदिति सानुषङ्गः पाठः।

---

१ C निमग्नो।

१५. स्विष्टकृन्निगमनमेतत्। अतस्तु पित्र्यायामूहः। अग्निः कव्यवाहनो होत्रेण हविरजुषतावीवृधत महो ज्यायो ऽकृतेति।

१६. अत्राप्यवसानं कविनामधेयग्रहणात्।

१७. असौ असौ इति एवं प्रथमया विभक्त्या युक्ते नामनी यजमानस्य। न होतुः। अभिव्याहृत्य। अभीतिवचनान्नोपनामकेन। विस्पष्टं निरवकाशम्[1]। तथा च श्रुतिः। उच्चैर्ग्रहीयाद्य-द्यप्याचार्यः स्यात् इति। नामनी इति शाखान्तरात्। असाव-साविति वीप्सानिर्देशः प्रथमानिर्देशश्च समासप्रतिषेधार्थं पृथगव-सानार्थं च। ननु कतमे द्वे नामनी। उच्चैर्ग्रहीयादिति वचनादुप-नामकस्याप्राप्तिरेव। गुह्यनाम्नोऽपि। तदस्य पिता माता च विद्या-तामिति नियमादिहाप्राप्तिः। नामकरणे पूर्वं तु दैवतं सर्वत्रेति[2] तुशब्दप्रयोगात्। सर्वत्रेति वचनादिह नक्षत्रदेवताश्रयं पूर्वं व्याव-हारिकमुत्तरम्।

१८. अभिव्याहृत्येति क्त्वाप्रत्ययदर्शनात् द्वितीयेन नाम्ना उत्तरां देवयज्यामित्येवमादेर्निगदखण्डस्य संधानम्। अथ पश्चा-ग्निषो वदतीति वचनात्पश्चाग्निषः पठित्वावसानम्।

१९. अवसानमत्र वाक्यपरिसमाप्तेः। अत्र सूक्तवाके ऽग्नि-शब्दो होतृशब्दरहितः। ततस्त्वाहवनीय उच्यत इति शङ्का। संप्रैषे तु दैव्या होतारा इति दर्शनात्स्विष्टकृतो ऽभिधानमिति शङ्का। एवमयं चोदनासंदेहः। तस्मादेषामग्निपदानां विकारे-ष्वप्यनूहः।

---

१ B C निरवकाशकम्। २ आ० गृ० १. १५।

२०. एनमित्यस्य पदस्य स्थाने न इति वा प्रक्षिपेत्।

२१. इष्टं च वीतं चेत्यारभ्य नमो देवेभ्य इत्यवस्येत्। ननु संज्ञाकरणं विना कथमस्य शास्त्रे संव्यवहारः। स्विष्टकृन्निगदे सूक्तवाके च (१.१६.१०.) अन्यच्च चाग्नीषोमीयात्सूक्तवाके नामधेयं (६.१.२४.) इत्यादिषु। उच्यते। संप्रैषोच्चारणसामर्थ्याद्यथा सामिधेनीनाम्। सूक्तवाकमन्त्राणामृच उच्यते। द्वियजमानके। ओमन्वती वामस्मिन्यज्ञे यजमानौ द्यावापृथिवी स्ताम्। बहुयजमानके। ओमन्वती वो ऽस्मिन्यज्ञे यजमाना द्यावापृथिवी स्ताम्। अस्मात्स्वधदिति स्वधिर्धातुर्दिवादौ स्वादौ च पठ्यते। ततश्चोदनासंदेशादनूहः। द्वियजमानके। आशासाते इमौ यजमानौ। बहुयजमानके। आशासत इमे यजमानाः। स्वयमपि सत्रादिषु यजमानस्य शौचं कुर्वतो ऽहं यजमान इति न भवति। स्वरिमान्यजमानानिति मन्त्रान्ते दर्शनात्। द्वियजमानके। अग्निशर्मप्रजापतिशर्माणौ। देवदत्तयज्ञदत्तावुत्तरां[1] देवयज्यामाशासाते भूयो हविष्करणमाशासाते आयुराशासाते सुप्रजास्त्वमाशासाते दिव्यं धामाशासाते। यदनेन हविषाशासाते तदश्यास्तां तदृध्यास्तां तदाभ्यां देवा रासन्तां तदग्निर्देवो देवेभ्यो वनुतां वयमग्नेः परि मानुषाः। अथ बहुयजमानके। अग्निशर्मप्रजापतिशर्मसोमशर्माणो देवदत्तयज्ञदत्तविष्णुमित्रा[2] उत्तरां देवयज्यामाशासते भूयो हविष्करणमाशासत आयुराशासते सुप्रजास्त्वमाशासते दिव्यं धामाशासते। यदनेन

१ A °दत्तशर्माणौ। २ A °मित्रशर्माण।

हविषाशासते तदस्मासुस्तदृध्यासुस्तदेभ्यो देवा रासन्तां तदग्निर्देवो देवेभ्यो वनुतां वयमग्नेः परि मानुषाः।

२२. स्तीर्णे बर्हिषि अञ्जलिमुभयहस्तसंयोगं निधायावस्थाप्य जपति नम उपेत्यन्तं मन्त्रम्। अथ बर्हिषि प्राञ्चमञ्जलिं निधाय जपति नम उपेतीति श्रुतेः।

२३. शंयोर्ब्रूहीत्येवमन्तेन निगदखण्डेन संप्रेषितो ऽध्वर्युणा होता तच्छंयोरावृणीमह इत्येतामृचमुक्त्वोपस्पृशेत्। परिभाषिते ऽपि संप्रैषवशात्कथं नाम होत्रावृत्तिः स्यात्[1]। शंयोर्वाक इति शास्त्रसंव्यवहारार्थं संज्ञाकरणम्। पुरा शंयोर्वाकात् शंय्वन्ता वेत्येवमाद्यर्थम्। उक्त्वोपस्पृश्येति क्त्वाप्रत्ययः शंयोर्वाकस्योपस्पर्शनमङ्गमित्येतस्य ज्ञापनार्थम्।

२४. अग्निर्होता वेत्वित्यादि स्रुगादापनम्। तत आरभ्य मन्द्रया वाचा तावद्यावदुत्तम आज्यभाग इष्टः। जपानामयं नियमो न भवत्यप्राप्तत्वात्। अग्निमन्थन एषवामाकाशादीनामनियमः प्राक् स्रुगादापनात्।

२५. प्रधानयागादारभ्य परं मध्यमया मध्यमेन स्थानेन।

२६. अनुयाजेभ्य आरभ्य उत्तमया वाचा उत्तमेन स्थानेन। अनुयाजप्रसवश्चानुयाजाङ्गत्वादुच्चैः।

---

१ A ins. इति पुनर्वचनम्।

१५.

१. उपांशु मृदुना शब्देन पत्नीसंयाजसंज्ञकैर्यागैश्चरन्ति पत्न्याश्रीभाध्वर्यवः। होतुरपि तद्देशगमनं तथैव च क्रियेत्येवमर्थमिदमुक्तम्।

२. सोमाद्याश्चतस्रो देवता यजति। ते वै चत्वारो भवन्तीति श्रुतेः।

३. राका च सिनीवाली च राकासिनीवाल्यौ द्वे देवते। उभयपदार्थप्रधानत्वाद्द्वन्द्वस्य। प्रजाकामस्येति प्रजोत्पत्तिमिच्छतो यजमानस्य। ननु षष्ठीनिर्देशः किमर्थम्। उच्यते। यजतीति पूर्वसूत्रे परस्मैपदनिर्देशाद्धोतुर्यजमानार्थं प्रजामिच्छत इत्याशङ्क्येताध्वर्युं मृतमिच्छन्निति यथा। पूर्वं त्वष्टपतेरिति राकासिनीवाल्योर्यागक्रमात् पाठक्रमश्च सर्वत्र विवक्षित इत्येतज्ज्ञायते। त्वष्टपतिरित्येकदेशनिर्देश उपलक्षणत्वात्।

४. यजतीत्युक्तम्। कथमित्याकाङ्क्षिते याज्यानुवाक्याः प्रतीकग्रहणेन पठति। तास्वेता ऋचो द्वादश षण्णां यागानां प्रत्येकं यथासङ्ख्येन द्वे द्वे भवतः। सोमस्य याज्यापुरोनुवाक्यायुगलम्। आ प्यायस्व समेतु ते पुरोनुवाक्या सं ते पयांसि समु यन्तु वाजा इति याज्या। आ प्यायस्व मदिन्तमेत्येषा न भवति। गायत्रीरचितत्वात्। अप्राधान्याच्च। एवमपि सति यावत्तोत्रे सकलपादपाठः। अनेनैव क्रमेण तत्र तिस्रो मा भूवन्निति। ननु आप्यायितवतीनामिति तत्रोक्तेः कथं संदेहः। आपोहिष्ठीयाभिरितिवदाशङ्क्येत[१]।

---

१ B इति यद्दा०।

सोमाप्यायने तु सोम विश्वेभिरंशुभिरिति लिङ्गात् सुतरामाप्नुयेत। तस्मात्सकलपादपाठः। त्वष्टुर्याज्यानुवाक्यायुगलम्। इह त्वष्टारमग्रियं पुरोनुवाक्या। तन्नस्तुरीपमध पोषयित्नु याज्या। ननु तन्नस्तुरीपमद्भुतमिति प्रथमा। कस्मादतिक्रम्यते। उच्यते। त्रिष्टुप् याज्या कर्तव्या। न च सा त्रिष्टुप्। यत्र पुनस्त्रिष्टुबपि पुरोनुवाक्यात्वेन विनियोक्तुमिष्यते तत्र सकलपादपाठः संदेहव्युदासार्थः। तद्यथा। पिशङ्गरूपः सुभरो वयोधाः तन्नस्तुरीपमध पोषयित्नु देवस्त्वष्टा सविता विश्वरूप इति पुरोनुवाक्या इति। अग्नीषोमीयप्रकृतित्वात् त्वाष्ट्रस्य तुल्यप्रतीकत्वात् प्राथम्याच्च। तन्नस्तुरीपमद्भुतमिति मा भूदिति सकलपादपाठः। एवं वैश्वामित्रीणां पशौ यातयामत्वे वासिष्ठी[१] प्रयुज्यते। देवानां पत्नीनां याज्यापुरोनुवाक्यायुगलम्। देवानां पत्नीरुशतीरवन्तु नः पुरोनुवाक्या। उत ग्ना व्यन्तु देवपत्नीरिति याज्या। यदि देवानां पत्नी राकामहं सिनीवालीति दृचा इत्युच्येत ततः पाठक्रमनियम[२] एवाङ्गीकृतः स्यात्। ततो देविकाहविःषु विपर्यासो न स्यात्। प्रत्येकं प्रतीकग्रहणाच्च[३] यातयामदोष[४] उत्प्रेक्ष्यते तत्र[५] विपर्यासः सिद्धो भवति। राकाया याज्यानुवाक्यायुगलम्। राकामहं सुहवां सुष्टुती हुवे पुरोनुवाक्या। यास्ते राके सुमतयः सुपेशस इति याज्या। सिनीवाल्या याज्यानुवाक्यायुगलम्। सिनीवालि पृथुष्टुके पुरोनु-

---

१ B ins. धाय्या। २ C om. नियम। ३ A ग्रहणय। ४ A ॰यामत्व-दोष। ५ A तत्रतत्र।

वाक्या। या सुवाङ्कः स्वङ्गुरिरिति याज्या। अग्नेर्गृहपतेर्याज्यानुवाक्यायुगलम्। अग्निर्होता गृहपतिः स राजा पुरोनुवाक्या। वयमु त्वा गृहपते जनानामिति याज्या। वयमु त्वा गृहपत इत्यत्र इतिकरणो नियमार्थः। अत्रैवैता भवन्ति। अन्यथा[१] प्रथमोपदिष्टत्वात् सर्वत्र प्राप्नुयुः।

५. यथा ह त्यद्वसवो गौर्यं चित्। एतामेव ऋचं जपित्वा नान्यत्किंचित् तत इळामुपह्वयते। इळोपहूतेत्येवमादिना निगदेन। अथ यदृचं जपति स्वस्त्ययनमेव तत् कुरुत इत्यर्थवादान्तरादर्शनादेवैतावानेव जपो नोपहूतं स्यादिति।

६. अथ पत्नीसंयाजेळायां उपहूतो ऽयं यजमान इत्यस्य स्थाने उपहूतेयं यजमानीति वा विकारो भवति। ननु यजमानशब्दो ऽकारान्तस्ततो यजमाना एव प्राप्नोति। तद्यथा। पचमाना ब्राह्मणीति। सत्यम्। पुंयोगादाख्यायामिति (पा० ४. १. ४८) वचनाद्यजमानीति भवति। तत ईकारं पठन् सूत्रकार एतज्ज्ञापयति यजमानप्रयुक्तो याग इति। किमेतस्य ज्ञापने प्रयोजनम्। सत्रेषु मृते यजमाने न परिसमाप्तिः पत्नी जीवतीति कृत्वा। अतश्च नेदिष्ठिना सहेतरे यजमानाः परिसमापयन्ति। मृतभर्तृकायास्तु तदन्तकर्म। ननु ये च यज्ञपतिं वर्धानित्यत्र कथं। उच्यते। विभाषा सपूर्वस्येति (पा० ४, १, ३४)। ईकारस्य पक्षे विधानादेवमपि साधुः प्रयोगः। यथा ग्रामस्य पतिर्ब्राह्मणीति (पा० ४. १. ३३)। द्विपत्नीके। उपहूते इमे यजमान्यौ। बहुपत्नीके। उपहूता इमा

---

१ A अन्यत्र।

यजमान्यः। ननु प्रकृतावूहो न प्राप्नोति। उत्तरस्यां तन्तावूहन-वचनात्। सत्यम्। किं तु प्रकृतौ यथार्थानां[1] स नियमः। अय-थार्थानां[2] तु प्रकृतौ विकृतौ च सर्वत्रोहः कर्तव्यः। विकारग्रहणाच्च। अश्वमेधे दर्शपूर्णमासादिभिः संस्कृतास्तिस्रो जाया उपक्लृप्ता भवन्ति। तत्र संस्कारत्वादूहः। पत्नीः संनह्येति च शाखान्तरे प्रैषपाठात्[3]।

७. येयमनन्तरेला एतदन्ताः पत्नीसंयाजाः। पत्नीसंयाजा इत्यधिकारे पुनः पत्नीसंयाजा इति वचनं नियमार्थम्। तेन इष्टीनामिलान्तत्व उक्ते पूर्वा इला प्रत्येतव्या। उत्सृजन्तः कर्माणि यन्तीति ज्ञापकम्।

८. शंयोर्वाक्ः शंयुस्तदन्ताः पत्नीसंयाजा वा भवन्ति। अस्मि-न्नपि पक्षे इला कर्तव्यैव। कुत एतत्। पूर्वविधानादिलायाः।

९. प्र त्वा मुञ्चामि वरुणस्य पाशादित्येवमादिना मन्त्रेण पत्नीसंनहनं योक्त्रं नान्यत्। पत्नीसंयाजप्रकरणात्[4]। तद्विमुचति। वेदं विमुच्य पूर्वतरम्। ननु क्रियामन्त्रयोर्मध्ये वेदं विमुच्येति किमर्थम्। उच्यते। साहचर्यार्थम्। अतश्च यत्र वेदविमोकप्रति-षेधस्तत्र योक्त्रविमोकप्रतिषेधोऽपि भवति। तद्यथा। दीक्षणीया-प्रभृत्यानूबन्ध्यायाः संस्थानाच्च वेदे पत्नीं (८. १२. ९) वाचयती-त्येवमादिषु योक्त्रविमोकप्रतिषेधः सिद्धो भवति।

१०. अञ्जलिरुभयहस्तसंनिवेशः। तस्मिन्नञ्जलौ पत्नीसक्ते योक्त्रं वेदं च विमुक्तं कृत्वा वक्ष्यमाणं करोति। पत्न्याः संनिधानाभावे

---

१ A प्रकृतौ यथार्थानां समवेतार्थानां तु स नियमः। २ A यथार्थायथा॰ C (sec. b) adds यथार्थानाम्। ३ C प्रैषाभावात्। ४ A ॰ शाखा इति करणात्।

अनाखभुकल्पे वा तद्योगे। तदा च न मन्त्रः[1]। कुत एतत्। अग्निहोत्रहोमे अञ्जलौ च पत्न्याः सं त्वा सृजामि प्रजया धनेनेत्यञ्जलाविति (२. १०. ५) यत्नात्। पत्न्यनेकत्वे ऽप्येकस्याः[2] परार्थत्वात्। संभवे सति एवंरूपाणि क्रत्वर्थानि ज्येष्ठा पत्नीति[3]। कुतः। सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा इति[4] स्मरणात्।

११. अद्भिः परिषिञ्चन्निति वचनात्सर्वत्र परिषेको ऽनिर्दिष्टद्रव्यको ऽद्भिः कर्तव्यः। अन्यत्रदृष्टं सर्वत्र भवतीति। वेदयोक्त इति यदि नोच्येत वेदस्यैव केवलस्य स्यात्। अनन्तरत्वात्। जपतीति वचनादुपांशुप्रयोगः। अनैकस्वर्यं च।

१२. एवमन्तं मन्त्रं वेदयोक्तं परिषिञ्चञ्जपेत्।

१३. घृतवन्तं कुलायिनमित्येवमादिकं मन्त्रं वेदे अञ्जलौ स्थिते ऽपनीय योक्त्रं होता पत्नीं वाचयति। भाणयतीत्यर्थः। शक्तौ सत्यामर्धर्चमर्धर्चं भाणयेत्। अर्धर्चन्यायाश्चर्च इति वचनात्। अशक्तौ तु यथाकथंचित्। वाचनस्य प्राधान्यात्।

१४. सा पत्नी तृणानि वेदादुत्कृष्य अन्तरेण मध्य ऊरू न्यस्यत इति। प्रक्षिपतीत्यर्थः। उपसर्गादस्यत्यूह्योरित्यात्मनेपदम्[5]। न्यस्यत इति। कर्त्रभिप्रायेण क्रियाफलार्थं वा। ततश्चानेका अपि कुर्युः।

१५ तन्तुं तन्वन्रजसो भानुमन्विहि इत्यनेन मन्त्रेण गार्हपत्यादुत्तरतः। आ बर्हिषः स्तीर्त्वा यावद्बर्हिराहवनीयान्तं स्तीर्णं तावत्। उत्तरेण गार्हपत्यमित्यसति पत्नीदेशादेव प्राप्नुयात्।

---

१ B C ॰कल्पेन न तद्योगे। कुत॰। २ A ins स्व। ३ B C ज्येष्ठपत्नानि or ॰त्नीनि। ४ याज्ञवल्क्य १. ८८। ५ See Mahâbhâshya ect. Kielhorn I. 232.

१६. आप्नुवानो ऽसीत्येवमादिना मन्त्रेण वेदशेषं वेदस्यावशिष्टं यत्तदुपतिष्ठते। वेदाधिकारे ऽपि पुनर्वेदवचनमास्तरितृविकल्पे ऽपि होतुरुपस्थानार्थम्। कथं वास्तरितृविकल्पः। उच्यते। तस्मा वेदेरास्तृणातीति शतपथे पत्न्या आस्तरितृत्वविधानात्।

१७. एतेनाग्ने ब्रह्मणा वावृधस्व अयाड् यज्ञं जातवेदा आभ्यामृग्भ्यामाहवनीयमुपस्थाय। उपस्थानं नाम भक्तिनम्रेण मनसाभिलषितार्थसिद्धये देवतोपधावनं तत् कृत्वा ततः।

१८. प्रथमे उपस्पर्शने उपस्पृशेत्। द्रव्यमुक्तं आपः ता उपस्पृशेत्। ननु अनन्तर आहवनीयो ऽधिकृतस्तमुपस्पृशेत्कस्मान्न[1] भवति। उच्यते। वेदशेषमुपस्थायेति प्रकृते पुनराहवनीयमुपस्थायेति वचनात्। अथ यदप उपस्पृशति शान्तिर्वै भेषजमापः शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियत इति श्रुतेः। उत्सृज्यते होता। व्यवायादिष्वनादृतो[2] भवतीत्यर्थः।

१६.

१. व्याख्यातावङ्गप्रधानद्वारेणोक्तौ दर्शपूर्णमासौ। व्याख्यातव्यान्यपि दर्शपूर्णमासयोरङ्गानि सन्ति। तद्यथा। प्रथमप्रयोगे ऽन्वारम्भणीया। अनुनिर्वाप्यः पिण्डपितृयज्ञश्च केषांचित्। तेषामपि विकृतावतिदेशः प्राप्नोति। तन्निवृत्त्यर्थं व्याख्यातवचनम्। दर्शपूर्ण-

---

१ A स्पृशेति। २ B ॰ष्विनो A C द्व C (sec. h) द्व।